नं० ५२६५

नाम - कात्यायन सूत्र व्याख्या नं. ३ अध्याय

कर्त्ता - याज्ञिकदेवः प्रजापतिदेवसुतः

पत्र संख्या - ३७ पत्राणि सं० - १९२२

विषयः - सूत्रपद्धतिः

कात्यायनसूत्रव्याख्यान तृतीयाध्यायः

५१६५

१३००

तृतीय
पत्र
२६



5765/37

पुरी

॥श्री
१

॥श्रीगणेशाय नमः॥ ॥होतृषदं कृत्वा परेण वेदिं श्रोणिं चोत्तरेण समिधमादायाग्नये समिध्य
मानायानुब्रूहीत्याह अध्वर्युर्वेदिमपरेण वेदेः पश्चाद्गार्हपत्याहवनीययोरंतराले होतृषदनं कृ
त्वा होतुरुपवेशनार्थं वरणादिरक्षजं शुष्ककुशैरास्तीर्णमासनं स्थापयित्वा अथवा वेदिश्रोणि
मुत्तरेण होतृषदनं स्थापयित्वा तत एव हि होतरि सेवं होतारमामंत्र्य होतरि तत्रागते सतीध्मादे
कां समिधमादाय हस्ते गृहीत्वाग्नये समिध्यमानायानुब्रूहीत्येवं होतारं प्रत्याह ब्रवीति स आ
ग्नये समिध्यमानायेत्यादिश्रुतेः॥ होता सीदन्निअस्मिन्निति होतृषदनं॥ तस्य करणमंत्रस्था
पनं॥ नत्व सत्तउ सादनं॥ आमंत्रिते होतांतरेणोत्करमित्यादिकात्यायनसूत्राद्धोतुरेहि होतरि
मामंत्रणं कर्त्तव्यं॥ वरुणप्रघासेषु अग्निभ्यां समिध्यमानाभ्यामनुब्रूहीत्यूहः॥ अनेक यजमान
केषूद्यनीयावहुत्वपक्षे ग्निभ्यः समिध्यमानेभ्योनुब्रूहीत्यूहः॥ ॥होतरि चैके॥ एके शाखिनोग्न
ग्नये समिध्यमानाय होतरनुब्रूहीत्येवंविधं प्रैषं कुर्वंति॥ तदुहैक आहुरग्नये इत्यादिश्रुतेः॥
प्रथमस्थानेन प्राक्स्विष्टकृतः॥ स्विष्टकृतः प्राक्सर्वे मंत्राः प्रथमस्थानेन प्रयोक्तव्याः॥ प्रैषा
णामप्ययमेव स्वरः॥ प्रथमस्थानं चोपांशुव्यपेक्षया किंचिदुच्चैर्भवति॥ मध्यमेनेडायाः॥ स्विष्ट
कृत आरभ्य आइडायाः मध्यमेन स्वरेण सर्वं मंत्रजातं प्रयोज्यं॥ शेषमुत्तमेन॥ इडांत आर
भ्य कर्मापवर्गांतं सर्वे मंत्रा उत्तमेन स्वरेण प्रयोक्तव्याः॥ अत उपांशु प्रयागः श्रुतेरित्यस्य द
र्शपूर्णमासनयोरप्रवृत्तिः स्वरांतरविधानात्॥ संवशानिवमेनुब्रूहीत्याह यजमानः॥ यज
मानोनेन मंत्रेण होतारं संबोधयेत् तत्त्वन्निसादिनो॥ अनूकमेवास्य सामिधेन्यस्तस्मान्नाब्रूया

राम
१

स्संनत्वंनन्निवमेनुब्रूहीतिश्रुतत्वात्॥अयंचहोतृसंबोधनार्थस्यतश्चप्रोषितेनवक्तव्यः॥तत्र
स्थेनेहसंबोधनासंभवात्॥होतुस्तुसंबोधनमंत्राध्वर्युणाकर्तव्यंविशेषकर्तुरसंभवेसामान्य
स्यसमाख्याप्राप्तस्यातिक्रमेकारणाभावादिति॥नदुक्तंगुणेषुप्रतिनिधिःपरार्थत्वादिति॥अने
कयजमानेष्वेकएवहोतारंसंबोधयति॥श्रुतत्वात्॥संतत्वन्निवनावनुब्रूहीत्यूहश्चभवति॥अं
गुष्ठाभ्यांचाववाधतेपाद्याभ्यांवेदमहमसुमववाधइतिद्वेष्यं॥चकाराद्यजमानएवेदमहमिति
मंत्रेणहस्ताभ्यांगुष्ठाभ्यांद्वेष्यंद्वेषार्हंवैरिणमववाधते॥आक्रामतिअंगुष्ठाभ्यांभूमिमाक्रामति॥द्वे
ष्यंमनसास्मृत्वाइदमहमितिमंत्रेणहस्तांगुष्ठाभ्यांभूमौपीडयतीत्यर्थः॥द्वेष्यस्यसन्निधावभा
वात्॥पादाभ्यांवा॥पादयोर्भवौपाद्यौ॥ताभ्यांपाद्याभ्यामंगुष्ठाभ्यामेवद्वेष्यमववाधते॥नहस्तां
गुष्ठाभ्यामिति॥वाशब्दोवधारणे॥कुतः॥काण्वानांपाद्याभ्यामंगुष्ठाभ्यामिति॥विशेषश्रवणात्॥
अववाधनंचप्रवोवाजाइत्साद्यासुसामिधेनीष्वनूच्यमानासुकर्त्तव्यं॥कुतः॥तस्मादेतास्वनूच्य
मानासुपदद्विष्यात्तमंगुष्ठाभ्यामववाधेतेदमहमसुमववाधइतिश्रुतेः॥यद्यप्यस्यांश्रुतावंगुष्ठा
भ्यामित्यविशेषश्रवणं॥तथापिकाण्वानांपाद्याभ्यामितिविशेषश्रवणात्सामान्यस्यविशेषप
रताप्राप्ताप्यताच्चनविकल्पः॥तस्मात्पाद्याभ्यामेवांगुष्ठाभ्यांभूमिराक्रमणीया॥अत्रासुमित्य
स्यस्थानेद्वेष्यस्यनामप्रयोज्यं॥तच्चकृतार्थं॥नपुरुषार्थं॥अभावेद्विषंतमितिभ्रातृव्यमितिवेति
पदांतरप्रयोगविधानात्यदीदंद्वेष्यस्यनामोच्चारणंपुरुषार्थंस्यात्तदाद्वेष्याभावेद्विषपदादिप
दोच्चारणंनविदधीत॥विहितंच॥अतोनेदंपुरुषार्थमिति॥अतश्चयजमानेप्रोषितेध्वर्युणा

श्री॰ २

अत्रैव कर्त्तव्यं॥ अंगानां प्रधानदेशकालतापाउचितत्वात्॥ कृत्स्नार्थत्वादेव चानेकेष्वेक एव करो
ति। अहोपि न भवति गुरूपार्थत्वाभावादेव॥ अभावे द्विषंतं भ्रातृव्यमिति वा॥ द्वेष्यस्याभावे इदम
हं द्विषंतमिव बाधे इति अथवा इदमहं भ्रातृव्यमव बाध इति प्रयोगं कुर्यात्॥ नारखांनराद्धि
कल्पः॥ यावत्सामिधेनीर्वेदे इदमहं तावतिथेन वज्रेणेति॥ इदमहमुमव बाध इति पूर्वोक्ते
व बाधनमात्रं अयमधिको विशेषः इदमहमिति सस्यानंतरं यावत्सो यावत्संख्याः सामिधेन्यो
स्मिन्कर्मणि तथा यावत्सामिधेनि॥ प्रस्तुतं कर्म यावत्सामिधेनि वेद यावत्संख्य सामिधेनीकं स्या
न्नीयात्॥ तावतिथेन वज्रेण द्विषंतमव बाध इत्येवंविधमंत्रप्रयोगेनावबाधने॥ तावतां पू
रणस्तावतिथः॥ तेन तावतिथेन॥ अयं भावः॥ यत्पंचदशसामिधेनीकं कर्म तत्रेदमहं पंचद
शेन वज्रेणेति ब्रूयात्॥ यत्सप्तदशसामिधेनीकं तत्रेदमहं सप्तदशेनेति॥ ननु प्रकृतौ पंचदशे
वसामिधेन्यस्ति हि पंचदशेन वज्रेणेत्येव कुतो नोक्तं॥ किं लक्षणवाक्येन सर्वं॥ पक्षांतरसज्ञावस्था
पनार्थं॥ अस्ति हि पक्षांतरमेकविंशति सामिधेनीरपि दर्शपूर्णमासयोरनुब्रूयात् इति स्मा
दृरिति॥ तत्रश्चतद्दाएकविंशेन वज्रेणेति सिद्ध्यर्थं लक्षणवाक्यमिति सदोद्द॥ इदमहमि
त्यस्योपनरूपादानं तावतिथेनेत्यस्यावसरविधानार्थं तावतिथेनेति पूरणप्रत्ययांतनिर्देश
स्य पंचदशेनैकविंशेन वा एकविंशतिनमेनवेत्येवं पूरणप्रत्ययांतस्य संख्याशब्दस्य प्रयोगः॥
सिध्यति न तत्र्यपि त्रयाणां सामिधेनी त्रितेदेव्यां यस्त्रेः संप्रसारणं वेति त्रिशब्दस्य तीयप्रत्ययां
तस्य प्रयोग इदमहं तृतीयेण वज्रेणेति॥ उपसत्कवचनवत्सु सामिधेनीषु इदमहं नवमेनेति प्रयो राम २

गः॥ नां तादृसंख्यादेर्म इति स्मरणात्॥ इष्टकापशौ च तेषां चतुर्विंशतिः सामिधेन्य इत्यस्मि
न्पक्षे इदमहं चतुर्विंशेन वज्रेण चतुर्विंशोत्तमेन वेति यथेष्टं प्रयोगः॥ प्राजापत्यपशुपक्षे तस्यैक
विंशतिः सामिधेन्य इति श्रुतत्वात्॥ इदमहमेकविंशेन एकविंशतितमेन वेति॥ विंशत्या
दिष्वेकस्तम इन्यत्र समिति स्मरणात्॥ प्रतिप्रणवमाधानं॥ सामिधेन्यनुवचनं कुर्वन्होता
पंचदशानामपि सामिधेनीनां मंत्रेषु प्रत्यृचं प्रणवं पठति॥ तत्राध्वर्युः प्रतिप्रणवं प्रणवे एकै
कस्येध्मस्याहवनीये आधानं प्रक्षेपं करोति॥ स चायं कालार्थः संयोगो नांगांगिभावः॥ उ
भयोरप्यग्न्यर्थत्वात्॥ इध्मस्याग्नीधनार्थः॥ सामिधेन्योपि ध्मानानाग्न्यनुवादिन्यः॥ प्रयोज
नं सामिधेन्याः अनुवाक्यायामिध्मकाष्ठप्रक्षिप्ते सामिधेनीअनूच्यत एव सामिधेन्यभावेपि पयस्या
यां इध्मकाष्ठानां प्रक्षेपो भवति अग्निंधनार्थत्वात्॥ उपवाजनसंसर्गादिवदग्निसंस्कारकत्वा
त्॥ सोत्रापरापां प्रतिप्रस्थातुरपि दक्षिणेग्नौ॥ समिद्ध इति प्रागतः सर्वमिध्ममेकवर्जमनुया
जार्थ्वेत्॥ समिध अग्न आहुतेस्मतः प्रतीकात्प्राग्यः प्रणवस्तस्मिन्प्रणवे एकवर्जं एकां सामिधे
नीवर्जयित्वावशिष्टं सर्वमिध्मं प्रक्षिपेत्॥ अनुयाजार्थ्वेदिति पक्षे नुयाजापवर्तिदैतेक य
वर्जमेकां वर्जयित्वा इहोनुयाजानामभवत्यं भावादेतद्विकृतिविषयं॥ आतिथ्यादावनुया
जाभावे समिसरिशेषणं न भवति॥ समिद्धो अग्न आहुतेस्मतः प्राचीत्रपत्सर्वमिध्ममभ्या
दध्यादधस्त्यस्त मिध इति॥ समिद्ध इसतः प्रागित्सतः शाक्षोपादानात्सामिधेनीविरुद्धावा
गंतूनां मंत्रायाः प्रणवे सर्वेध्मस्य प्रक्षेपः॥ कुंग्ह्रद्धोहि काष्ठवद्धिर्भवति॥ तथा चाहापस्त

श्री २
3

वः॥प्रणवे प्रणवे समिधमादध्याति समिधेनी विवृद्धो काष्ठानि विवर्द्धन्ते प्रतिह समानासु प्रकृतिव
त्समिद्धो अग्न आहुतेस समिद्धाये कामनूयाज समिधमवशिष्य सर्वमिध्मशेषमभ्यादध्यात्परिधा
नीयायावेति॥अनुवचनान्ते वेदनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्याहाग्निमग्नी
सम्मृड्ढीति॥त्रिरेव प्रथमां त्रिरुत्तमामनवानं न्नुब्रूयादिति प्रकृत्यैतेऽनुवचनमिति श्रुतं॥अनो
नुवचनान्तः सामिधेन्यन्तः॥तस्मिन्ननुवचनान्ते सामिधेनीनामन्ते ध्वर्युर्वेदेन करणभूतेनाहव
नीयमग्निं त्रिरूपवाज्य वीजयित्वा आज्यस्थाल्याः सकाशाद्गृहीत्वा स्रुवेणाहवनीये उत्तरे भा
गे ऋजुं दीर्घं सततं प्राञ्चं तूष्णीमेव पूर्वमाघारमाघार्य ततोऽग्नीध्रं प्रति अग्निमग्नीत्सम्मृड्ढीति मंत्रशे
षमाह॥स स्रुवेण पूर्वमाघारमाघार्याहाग्निमग्नीत्सम्मृड्ढीति श्रुतत्वात्॥तथा स्रुवेण न माघारय
ति न स्वाहेति वचनेनेति श्रुतत्वाच्च॥अत्र प्रजापतिर्देवता॥अनिरुक्तत्वात्॥पूर्वो देवतासामान्यादि
ति सूत्राच्च॥अत्र स्वाहाकारोपि न भवति॥न स्वाहेति वचनेन प्रतिषेधात्॥वचनेऽशब्दोप्यर्थो॥स्वाहेत्यपि
न भवतीत्यर्थः॥तथा चाहापस्तंबः॥प्रजापतिं मनसा ध्यायन्निति॥उपवाजनं त्वदृष्टार्थं॥न हि
वेदेन त्रिष्व विशिष्टोपवाजनेनाग्नेर्दीपनं दृष्टोऽर्थः संभवति॥तस्माददृष्टा[illegible]र्थमेव॥प्रयोजनप
रिशिष्टमपि भवति स्रुवेणेति जुह्वा निवृत्त्यर्थं॥यतो जुह्वा वचनं इति होमे जुहूः प्राप्नोति॥आघा
रमिति संज्ञा व्यवहारार्थं॥आघार्यस्येतदृज्वादिगुणप्राप्त्यर्थं॥ऋजुमाघारयति॥दीर्घमाघारय
ति संततमाघारयति प्राञ्चमाघारयतीति॥वरुणप्रघासेषु सौत्रामण्यां चाग्नीदग्नीन्संमृड्ढीसू राम
हः॥क्रमेणोभयोः संमार्गः॥पूर्वाघारस्त्व अदृष्टार्थ आरादुपकारकः॥अतश्च यावदुक्तेग्रहेमे ३

धीयपयस्याद्दोनभवति॥उपवाजनंतुप्रवर्ततएवाग्नेरदृष्टसंस्कारत्वात्तःमानवेछास्रुदेवतास्त्वप
उपस्थन्स्यवेदेनाग्निंत्रिरुपवाजयसग्रंवेधाःसम्यज्यन्पूर्णस्रुवंध्रुवायामवनीयतस्योपहस्यवेदोप
यामउत्तरंपरिधिसंधिंसर्न्नीयित्वोत्तरार्द्धेभ्याहितस्यप्राचीनंमनसाप्रजापतयेस्वाहेतिज्वलति
जुहोतिसंपातेनध्रुवामाप्याज्यपथास्थानंस्रुवंवेदंचनिदधातीति॥काठकेच॥इध्मास्तमिधंशि
ष्ठाप्रणवेप्रणवेसमिधमादधासन्रुक्तास्स्रुवेणाघारंमनसाप्रजापतयेस्वाहेस्रुत्तरार्द्धेग्नेःसत
तंदीर्घंप्राचंज्योतिष्मासाधारमाधार्याहाग्नीसारिधीश्वेसादि॥इध्मसंनहनैरिध्मबंधनार्थै
स्तृणैरनुपरिधिसन्निकृष्टेषुत्रिष्वग्निप्रदेशेषुप्रदक्षिणंक्रमेणैकैकस्मिन्प्रदेशेआहवनीयमग्निं
त्रिस्त्रिःसंमार्ष्टिअग्नेवाजदितिमंत्रेण॥संमार्जनेनाग्निंविरजस्कमुज्वलंकरोतीत्यर्थः॥किंकृत्वाप
रिक्रामंपरिक्रम्यततसरिधिदेशंगत्वातद्दायामानुसारेणपार्श्वतोग्निंसंमार्ष्टीत्यर्थः॥अथसंमार्ष्टि
तिप्रकृत्यपरिक्रामन्संमार्ष्टिपरिक्रामंहियोग्यंयुंजंतित्रिस्त्रिःसमार्ष्टीत्रिरद्भिपन्नःससंमार्ष्ट्यग्नेवा
जजिदितिश्रुतेः॥अत्रहरिस्वामिनः॥परिक्रामंपरिक्रम्यप्रकृतत्वात्तमेवाहवनीयंपूर्वेणपरिक्रम्यप
जनिस्थानेस्थितोदक्षिणपार्श्वेसंमार्ष्टिततस्तत्रैवस्थितःपश्चिमपरिधिलग्नंसंमार्ष्टि॥ततःपूर्वेण
परीत्यउत्तरतःसंमार्ष्टिउपरिन्वसवंपरिक्रामं॥अन्यैंनचेहकश्चित्तस्यक्रमस्यस्ताहुः॥अग्निसं
स्कारायपश्चिमपार्श्वेप्रथमंपरिधिःपरिहितस्ततोदक्षिणततस्ततउत्तरश्च॥अग्निप्रकरणेप्ये
वमेवयोगोदृष्टो विरोधस्तथापिसुदक्षसंस्थैवभवतीतिपश्चिमपार्श्वएवप्रथमंसंमार्जनीयस्त
तोदक्षिणतस्ततउत्तरतश्चेति॥त्रिस्त्रिरितिद्विर्द्विरितित्रिस्त्रिरितिवासा॥तत्रचप्रतिदिशंसकृ

नचेहकश्चित्तस्यक्रमस्य

श्री
४

५

सकृन्मंत्रेण॥ द्विर्द्विस्तूष्णीं॥ तूष्णीमुपरि परिक्रामन्नित्यत्राप्यनुवर्त्तते॥ परिक्रम्याहवनीयस्योपरिम
ध्यप्रदेशे तूष्णीं त्रिः संमार्ष्टि॥ त्रिस्त्रिरिति वीप्सयात्रापि त्रित्वप्राप्तेः॥ अत्र सूत्रे तूष्णीमिति पलाहृत्या
सकृत्तिसृषु दिक्षु प्रतिदिक्त्रीन्मंत्रावृत्तिर्भवन्तीति ज्ञापयति॥ अथोपरिष्टात्तूष्णीं त्रिरिति सूत्रे॥ उपरि
ष्टात्तूष्णीमिति ब्रुवन्नाग्नेयेषु सकृत्सकृदावर्त्तते संमार्गमंत्र इति दर्शयति॥ इतरथा ह्येकद्रव्यैककर्मार्थ
त्वात्सकृन्मंत्रवचनमिति संमार्गार्थो सकृदेव मंत्रः स्यात्॥ केचित्तु काण्ड्यश्चैवमाहुः न परिध्यनुप्रधान
क्रमेण संमार्गः॥ न ह्ययं परिधिसंस्कारो येनाभिप्रवृत्तस्तत्क्रम आश्रीयते॥ अग्निसंस्कारस्त्वयं॥ तेन
प्रदक्षिणोपचारोदकसंस्कृतासंपादनाय प्रथमं दक्षिणतः संमार्गः॥ सन्नायं संमार्गो यावदुक्तो भव
ति॥ कुतः॥ होमसाधनभूताहवनीयद्रव्यसंस्कारत्वात्॥ अदृष्टार्थश्चायं॥ तेनाहवनीयस्थानापन्नास्व
परिस्त्रिस्त्वपि भवति+ अपरेणाहवनीयादंजलिं करोति नमो देवेभ्यः स्वधा पितृभ्य इति दक्षिणोत्ता न
नं॰ तत्रार्थो वाजजितो वाजं वसरिष्यन्तीर्वाजजितः संमार्ज्मि स्रुहे॥ आहवनीयादपरं आहवनीय
स्य पश्चात् जुहूपभृतोः पुरस्तान्नमो देवेभ्य इति मंत्रेणाध्वर्युरंजलिं करोति॥ पूर्वाभिमुख एव यज्ञो
पवीती सैव॥ मंत्रः॥ उत्तानौ पाणी कृत्वा जुहूपभृतोरग्र इति॥ तदेतदंजलिकरणमुत्तराघारार्थं॥ कु
तः॥ श्रुतेः सकृच्चोत्तरमाघारमाघारयिष्यन्पूर्वेण स्रुवावंजलिं न दधाति नमो देवेभ्यः स्वधापि
तृभ्य इति॥ अतश्चोत्तराघाराभावे अंजलिकरणाभावः॥ अपउपस्पृश्य सुयमे मे भद्र इति जुहूपभृतावा
दायोत्तरां जुहूं कृत्वा दक्षिणातिक्रामन्संप्रिणाविष्णुमिति॥ अंजलिकरणानंतरमपि उपस्पृश्यो राम
दकं स्पृष्ट्वा प्रथमं पाणिभ्यां जुहूमादायोत्तरां कृत्वा उपभृत उपरि निधाय ततः सुयमे मे भद्र इति मंत्रांते ४

ध॰ नमस्कारार्थत्वात् धुरंजलिं ततः स्वधा पितृभ्य इति मंत्रेण तस्मादंजले रक्षितो द्वितीयमंजलिं करोति ×पद्॥
दक्षिणेन भुजाने

तेद्धपिस्रुचौ स है वा दायां ध्रिणा विष्ठविति मंत्रेण दक्षिणातिक्रामति दक्षिणस्यां दिशि गच्छतीसर्थः ॥ स्रु
यमेमेभूयास्त्वमिति स्रुचावादत्त इति श्रुतेः ॥ आपस्तंबः ॥ उपभृति जुहूमस्याद धाति मुखतोभिहृसमुख
तयावहरति सर्वत्रैवमस्याधानोपावहरणे भवतो न च सिंजयति नाभिदेश्लोक्तश्चौ धारयस्यग्नाविष्णू
मा वामवक्रमिषमिसग्रेण स्रुक्चौरपरेण मध्यमं परिधिं मनवक्रामन्प्रस्तरमिति ॥ नन्वयमुपस्थश्रेयोति
नवक्तव्यं ॥ पित्र्यं मंत्रमुक्त्वापउपस्थश्रेदिति परिभाषायामुक्तत्वात् ॥ इति चेत ॥ न ॥ प्राचीनावितित्व
दक्षिणामुखत्वयोर्बुद्धासाधर्म्यं पुनरुक्तमिसदोषः न नूत्तरां जुहूं कृत्वेसेतत्व्यर्थमुक्तं ॥ पाणिभ्यां जुहूं
परिगृह्योपभृत्स्याधानमादानकाल इति परिभाषामुक्तत्वात् ॥ सत्यं व्यर्थं ॥ व्यर्थसदेतस्यार्थस ज्ञाप
कं भवति ॥ पंत्रवज्जुहूपभृतो रादानमुत्तराधारार्थ एवादाने भवति ॥ नप्रयाजाद्यर्थ आदान इति यतः
पुनः सूत्रकरणे नैवं ज्ञायते न्यस्मात्स्रुगादानादिदं स्रुगादानमन्यकृतो विशिष्टमिति ॥ अध्रिणा विस
यं यजति स्थानं प्रतिगमने मंत्रः ॥ सोप्युत्तराधारार्थगमने एवावांतरप्रकरणात् ॥ परिधीनपरेण
संचरो होष्यतः ॥ अपरेणेसेन प्रभस्य यां नं न संयोगे एनपाद्वितीये ति परिधीनिति द्वितीया ॥ परिधी
नपरेण परिधीनां पश्चात्स्रुचां पूर्वेण होष्यतो होमं करिष्यतोध्वर्योर्गमनागमनाय यं संचरो मार्ग
इत्यर्थः ॥ संचरस नेनेसस्मिन्वेति संचरः गोचरसंचरेति घः ॥ सर्वार्थोयं संचरति नोत्तराधारमा
त्रे ॥ होष्यतः संचर इत्युक्तत्वात् अन्यथा परिधीनपरेण दक्षिणातिक्रामतीसेतावदेव ब्रूयात् ॥
सव्येनेतो दक्षिणेनागुतः ॥ गच्छतीति सूत्रशेषः ॥ इतोस्माल्लानानृ यजति देशांगच्छ सव्येनपादे
न गच्छति ॥ अमुतोयजतिदेशात्प्रसा गच्छं दक्षिणेन पादेन प्रसागच्छति ॥ एकैकेन पादेन गंतुम

श्री
५

द्वाक्यत्वात्तस्यप्रथमप्रवृत्तिर्विवक्षिता॥तेनेतोगच्छतासव्यपादःप्रथमंप्रथममतिक्रमणंप्रगन्तः
प्रेरणीयः॥आगच्छतान्वदक्षिणइति॥अथातोतिक्रमणस्येतिप्रकृत्यप्रआश्रावयिष्यंसव्येना
तिक्रामतिदक्षिणेनप्रत्याव्येतिश्रुतेः॥एतदपिसर्वार्थमेवअथातोतोतिक्रमणस्येत्यतिक्रमण
मात्रंप्रकृत्यश्रवणात्॥नचाश्रावयिष्यन्नितिश्रवणादाश्रावणविशिष्टएवातिक्रमणेयंनि
यमइतिवाच्यं॥तथासतिविशिष्टानुवादलक्षणवाक्यभेदापत्तेः॥तस्मात्सर्वार्थमेव॥अतए
वसूत्रकारेणोत्तराधारेसूचितं॥उक्तंच॥आश्रावणविशिष्टेतुनियमोयद्ययंभवेत्॥विशिष्ट
स्यानुवादत्वाद्वाक्यभेदःप्रसज्यतइति॥ ॥वसुमतीमिसंवस्त्राय॥१॥इतरंइंइतिजुहोत्युत्त
राधारं॥वसुमतीमग्नइतिमंत्रेणयजतिदेवोउदइआउ·अवस्थापयित्वाजुहूमवतार्येतदिंद
इतीमंत्रेणाहवनीयस्यदक्षिणभागेऋजुंदीर्घंसततंप्राञ्चंजोहवेनाज्येनोत्तराधारंजुहोति॥त
स्माद्दक्षिणानस्तिष्ठन्नाधारयतिसंयड्भयनआधारयतीतिचश्रवणात्उभयत्रइतिपूर्वाधा
रउत्तरतः॥उत्तराधारश्चदक्षिणइति॥उत्तराधारइत्यस्यसंज्ञासंव्यवहारार्थजुहोतित्वादुप
वेशानेप्राप्तेअवस्थापयेसनेनतद्बाध्यते॥कुतः॥तिष्ठंस्तयंवाचेतस्माद्दक्षिणतस्तिष्ठन्नाघारयती
तिवचनात्॥अतउत्तराधारेतिष्ठतिक्रियावाचनिकोतेनप्राप्तरूढ्यादिजुहोतिष्वपिसकृद्गृही
तेनाज्येनतिष्ठतैवेंद्रायस्वाहेत्युत्तराधारोहोतव्यः॥मंत्रवर्णाधात्रेंद्रोदेवता॥कथं॥इन्द्रं॥इत
इंइइतिजुहोतीतिलिंगोविहितः॥होमश्चदेवतोद्देशेनपरिसक्तस्यद्रव्यस्यपरित्यागः॥तत्रावश्यं राम
भाविन्यांदेवतायांतद्धितचतुर्थ्योरश्रवणान्मंत्रस्यचक्रियासाधनाभिधायित्वसामर्थ्यात्तो ५

मंत्रवर्णाद्देवतापरिकल्प्यते॥ अतश्चाग्नेंद्रो देवता॥ नतश्चेदमिंद्रायेति होमात्पूर्वः स्त्यागः कर्त
व्यः॥ यागे होमे च प्रक्षेपात्पूर्वं अवश्यं सर्वत्र त्यागः कर्तव्यः॥ तथा च कारिकायां॥ आदौ द्रव्यप
रित्यागः पश्चाद्धोमो विधीयते॥ प्रयोग इदमिंद्राय न ममेति यथार्थतः॥ अवत्तं तु सृजेद्द्रव्यं
मनसा वचसापि च॥ ततश्च प्रक्षिपेदग्नाविति धर्मः सनातनः॥ असत्यक्त्वा जुहुयाद्यस्तु मोहेना
न्वितमानसः॥ देवा हव्यं न गृह्णंति कव्यानि पितरस्तथा॥ यत्किंचिज्जुहुयादग्नौ तत्सर्वं त्याग
पूर्वकं॥ अन्यथा जुहुयाद्यस्तु नरकं स तु गच्छति॥ तथा च त्रिकांडमंडनः॥ तुल्यएवाधिकारस्या
दंपत्योरुभयोर्मिथः॥ कर्तृत्वं च तयोस्तुल्यं मंद्रव्यत्यागे प्रचक्षतो यद्वा त्यागं पतिः कुर्यात्सल्लीन
दनुमन्यते॥ अधिकारेपि वैषम्यं स्रोतं च शाखानुसारिणा॥ तथा संन्निधौ यजमानस्यादुद्देशत्या
गकारकः॥ असन्निधौ तु पत्नी स्यादुद्देशत्यागकारिका॥ असन्निधौ तु पत्न्याः स्यादध्वर्युस्तद
नुज्ञया॥ उन्मादेप्रसवे वर्तौ कुर्वं तानुज्ञया विना॥ सर्वदा यजमानो वा सृजेत्तद्दिग्भुवः पृत्विरिति
त्यागवाक्यस्यादावोंकारश्च कर्तव्यः॥ यागहोमादिष्विति सर्वानुक्रमण्यामुक्तत्वात्॥ स चायमु
त्तराधार आरादुपकारको दृष्टार्थः॥ ततश्च गृहमेधीयोपसत्स्य स्याद्यो यावदुक्ते निवर्तते॥ चतु
र्गृहीतं वाएतदभूत्तस्याधारमाधार्यं त्रिरतः प्रयाजांन्ययजतीति प्रयाजार्थता वाज्ञो हवस्य
वचनात्॥ सयघ्रुवु जुह्वां गृह्णाति प्रयाजेभ्यो हि तद्गृह्णातीति अतश्च दर्विहोमेषु प्रयाजाभावे
तदर्थजौहवाभावेप्याघारस्यावश्याकर्तव्यता त्सुवाल्याः सरुद्गृहीतेनेंद्राय स्वाहेति मंत्रेण तिष्ठ
तैव होतव्यः॥ मानवे दक्षिणार्द्धभ्या हि तस्यो द्वों अध्वर इति सततं प्राचं दीर्घमृजुमूर्ध्वम विछि

श्री ६
८

न्त्वमाघारमाघारयतीति॥ लौगाक्षिरपि॥ विष्णोः स्थानमसि इतः स्था यो ऽर्ध्वो अध्वर इति दक्षिणार्द्धे
ग्नेः संततं दीर्घं प्राञ्चमिति॥ आघार्यासंस्पर्शयंस्स्रुच्यावेसं जुह्वा ध्रुवाः समनक्ति संज्योति
नि॥ आघार्येति चक्रत्वादिगुणप्राप्त्यर्थं होमस्य पूर्वसूत्र एव जुहोतिशब्देन विहितत्वात्॥ श्रू
यते चाघारौ प्रकृतस्त्रुमाघारयतीति सन्ततं दीर्घं प्राञ्चमिति॥ आघारानन्तरं स्रुचौ परस्पर
म संस्पर्शयन् स्रसय अनिस्थानाद्दक्षिणः पश्चात्प्रागस्योपविश्य जुह्वा जौहवेनाज्येन ध्रुवां ध्रौव
माज्यमनक्ति जौहवं ध्रौव मध्ये जुह्वेव क्षारयतीत्यर्थः॥ संज्योतिषेत्यनेन मन्त्रेण अत्र गच्छ
तामिति सध्याहारः॥ ननु जुह्वा ध्रुवामिति सूत्रितं॥ किमिति जौहवेन ध्रौवमिति॥ व्याख्यायते॥
अंजनक्रियोपदेशसामर्थ्यात्॥ ज्योतिर्वा इतरस्यामाज्यं भवति॥ ज्योतिरितरस्यां तेनेवेनदु
भे ज्योतिषी संगच्छेते इति श्रुतेः॥ ननु तर्हि जौहवेनेत्येव किमिति नोक्तं॥ कथं जुह्वेति॥ स्रुच स्म
करणत्वावारणार्थं जुह्वेत्युक्तमिति न दोषः स वाय ध्रुवासंस्कारोऽप्युत्तराघारे स्रुक्सेव प्रवर्तते॥
यतः एवं श्रूयते॥ अथासंस्पर्शयंस्स्रुचौ पर्येस ध्रुवयासमनक्ति शिरो वै यज्ञस्योत्तर आघारः
श्रीर्वै ध्रुवा न दास्यन्येवेनच्छिरः प्रतिदधातीति॥ निधायेध्मं संनहनान्यादायाश्रावयेत्साह॥ ध्रु
वासमंजनानंतरं स्रुचौ निधाय स्वस्थाने सादयित्वा होतारमुत्तरेण गत्वोत्करस्य पश्चात्प्राङ्मुखो
चस्थाय इध्मसंनहनान्यादाय हस्ते गृहीत्वाश्रावयेत्साह॥ स वै प्रवरायाश्रावयतीत्सइध्म संन
हनान्येवाभिपद्याश्रावयतीति श्रुतेः॥ अस्तु श्रौषडिति सग्नीत्॥ अस्तु श्रौषडित्येवं पुनरग्नी राम
त्सप्रत्याश्रावयति॥ वेदिं बर्हिरिध्ममित्याकल्पयपृच्छियेके॥ एके शाखिनो वेदिं बर्हिर्वदंतः बर्हिरा ६

दायेध्मशकलं वा परिधिं वादायाश्रावयंतित्तद्वैके वेदे स्तीर्णा ये बर्हिरभिपद्याश्रावयंतीध्मस्य वा श
कलमपछिघाभिपद्याश्रावयंतीति श्रुतेः॥ अभिपद्येत स्यादादाय गृहीते सर्थः सर्वत्र कुतः सूत्रकृतास
ह्यासन्नहनान्येवाभिपद्येतेति श्रुतेआदायेति सूत्रितत्वात्॥ अथ परिधिमभिपद्याश्रावयती
ति श्रुतेः॥ अथ यं परिधिं गृहीतेति सूत्रितत्वाच्च॥ एवं सर्वत्राश्रुतप्रत्याश्रुतेषु॥ सर्वत्राश्रुतप्र
त्याश्रुते द्वेवं भवति॥ एवमिसाश्रावणे अध्वर्युः प्रत्याश्रावणे अग्नीदिति॥ तथा च सूत्रं॥ आ
श्रावयस्यध्वर्युस्तदग्नीध्रं यस्तु उपावर्तते सोग्नीन्नापव्याहरेदाप्रत्याश्रावणात् प्रत्याश्रावयस
ग्नीदिति॥ अत्र चाध्वर्य्वग्नीध्रावाश्रुतप्रत्याश्रुतेषु सर्वत्र दर्शयति॥ पितृभूत्याचार्यास्त्वेवं व्या
चक्षते॥ सर्वत्राश्रुतप्रत्याश्रुतेष्विध्मसन्नहनान्यादायाध्वर्युराश्रावयेदाग्नीध्रश्च प्रत्याश्राव
येदिति॥ तदयुक्तमिति कर्काचार्याः॥ तत्राश्रावणमात्रविधानमेषामेति॥ तस्माद्यदुक्तमेवार्थः॥
अत्राहापस्तंबः॥ इध्मसंनहनानि स्यंउपसंगृह्य वेधाश्वत्तणमव्यंतमादायोत्तरतः प्रवणमावति
तिष्ठेतपूर्वोध्वर्युरपरआग्नीध्र इध्मसंनहनान्याध्वर्युरग्नीध्रोन्वारभ्यो आश्रावयेत् प्रत्याश्रावयतिअ
स्तुश्रौषडिति साग्नीध्रोपरेणोत्करं दक्षिणामुखस्तिष्ठत्स्फ्यं संमार्गांश्च धारयन् प्रत्याग्नीध्रे सोमेस
र्वत्रैवमाश्रुतप्रत्याश्रुते भवतः॥ मानवे च॥ स्फ्यं संमार्गपाणिराग्नीध्रः पश्चादुत्करस्योर्ध्वस्तिष्ठ
न्नस्तुश्रौषडिति प्रत्याश्रावयतीति॥ काठके स्फ्यं संमार्गमन्वारभ्याहेति॥ अथ प्रवृणीतेग्निर्देवो
दैव्यो होता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवदमुवदमुवदिति यजमानार्षेयाराषा हपर
स्ताद्वावींवित्रीणि क्रमस्य पाठादेव प्राप्तत्वाद्यथ द्राउपम्नह इध्मस्योत्तरत्वानुकर्षणार्थः॥ अथग

श्री ७ हीतेनैवेध्मसंनहनादिनाहोतारंप्रवृणीते॥अग्निर्देवोदैव्यइत्यादिनामंत्रेण॥अथवाश्रुतमसा
श्रुतयोः॥प्रवरणार्थत्वात्तापनायायत्राह्वः॥सवैप्रवरायाश्रावयतीतिश्रुतेः॥अमुवदमुवदिस
त्रसर्वनामस्थानेयजमानस्यसंबंधीतिपूर्वजभूतानिपरस्तान्पितृस्थानीयावरर्वाविपितान
सुत्रतसोत्ररूपाणित्रिरापार्षेयाणिरूपेरपस्थाणिवृणीति॥साम्नाकर्मणिप्रवर्त्तयतियजनुच्चा
वहमुन्वेति॥त्राणीतिकुतः॥त्रीन्वृणीतइतिश्रुत्यास्यांतरात्॥परस्तादर्वाक्प्रवृणीतइतिप्ररूस्ते
दृष्टहिसेनवाग्नेयपुत्रोयपौत्रइतिश्रुतेश्चयजमानग्रहणंकृत्विगार्षेयमुदासार्थंअथार्षेयं
प्रवृणीतइति॥यजमानस्यऋषिस्तस्यपूर्वजोमंत्रदृक्तस्यापत्यमार्षेयं॥प्रवृणीतेइतिहरिस्वा
मिनः॥यावन्तोवामंत्रकृतः॥अथवायजमानस्यवंशसंबंधिनामृषीणांमध्येयावंतऋषयोमं
त्रकृतोमंत्राणांद्रष्टारोभवेयुस्तावतोवृणीतेनत्रीण्येवेतिनियमः॥नेचप्रवराध्यायेगोत्रविशे
षेणसर्वेषांकल्पिताःसंति॥केषांचिदेकःकेषांचिद्वौ॥केषांचित्त्रयः॥केषांचित्संचेति॥तेनयत्रगो
त्रस्ययावंतस्तत्रउक्तास्तस्यतावंतोवरीतव्याइत्यर्थः॥तथाचाहापस्तंबः॥ऊर्ध्वजुमासीनं
होतारंवृणीतेग्निर्देवोहोतादेवान्यक्षद्विद्वाश्चिकित्वान्मनुष्वद्भरतवदमुवदमुवदितियथार्षेयो
यजमानस्त्रीण्येकमृषिमंत्रकृतोवृणीतेपिवैकंद्वौत्रीन्यंचनचतुरोवृणीतेनपंचातिवृणीतइ
ति॥मानवेपि॥अमुवदमुवदित्यूर्ध्वान्यजमानस्यर्षीन्प्रवृणीतएकेदेन्यंचवेति॥पुरोहितार्षेये
णवाराज्ञोयजमानस्यपुरोहितस्यगुरोरार्षेयाणिवावृणीतेस्वकीयानिवेत्यर्थः॥क्षत्रियवैश्य राम
योश्चनित्यं॥अभिषेकादिरहितस्यक्षत्रियमात्रस्यवैश्यस्यचनित्यंपुरोहितार्षेयोच्चारणं॥नार्षे ७

यं वृणीते॥ राज्ञस्तु विकल्पः॥ मनुवदिति वा सर्वेषां॥ अथवा सर्वेषां ब्राह्मणक्षत्रियविशां मनुव
दिति एतत्सर्वं सहृदेवर्षेयस्थाने प्रयोज्यं॥ अभ्यासे कारणाभावात्॥ आपस्तंबः॥ पुरोहितस्य प्र
वरेण राज्ञा वृणीत इति॥ अपि वा नार्षेयं वृणीत मनुवदित्येव ब्रूयादिति च॥ मनुरपि॥ यद्यब्रा
ह्मणो यजेत पुरोहितस्य प्रावितारो सोमानुष इति होतृनामग्रहणं॥ आर्षेयोच्चारणादनंत
रं ब्रह्मण्वदित्यादिकं मंत्रशेषं ब्रूयात्॥ तदेते सोमानुष इत्यत्रासाविति अस्य पदस्य स्थाने मुक
शर्मेति होतुर्नामग्रहणं कुर्यात्॥ असोमानुष इति तदि मम मानुष इति होतारं प्रवृणीत इतिश्रु
तत्वात्॥ उपांशु वा॥ अथ होतृनामग्रहणमुपांशु कुर्यादुच्चैर्वेति विकल्पः॥ सीद इति होता
होवुरूपांशुनामग्रहणानि॥ मानुषवत्सर्वैरित्यापस्तंबः॥ अग्निर्देव इत्यादेरयमर्थः॥ अग्नि
रयं देवः न मानुषः न भूतमात्रमचेतनं देव्यो देवैरपि पुरस्कृतः संभावितशक्तिः॥ होता साधु
ह्वाता यदीदृशो होता॥ स देवान्यक्षत् यजतु आवहतु च॥ तमहं होतारं वृण इत्यर्थः॥ विद्वान्
जानानः यथा यत्र च यद्यप्योनादौ संसारे अस्तकर्मस्वर्थः॥ कथंचिकित्वान्॥ चेतनावान्
अविस्मरणशीलः॥ सोऽधुनाप्यप्रमत्तः सन् मनुष्वत्॥ मनोरिव॥ यथा स्वायंभुवादेर्मनोयज्ञे
ग्निना देवा इष्टास्तथास्यापि यजमानस्य यज्ञे यजत्विसर्थः॥ भरतवत्॥ भरतो मानवो वावर्षा
धिपतिस्तस्येवा वसिष्ठादिर्यजमानस्य पूर्वजो मंत्रकृतस्येव॥ ब्रह्मा सर्वेषां पूर्वजस्तस्येव॥
आ च वक्षत्॥ आवहतु च॥ यद्यपि चैवमग्निरेवात्र होता॥ तथापि ब्राह्मणा अस्य यज्ञस्य प्र
कर्षेणावितारो रक्षितारः ते ह्येनं तत्त्वानाः प्रसक्षमुपलभ्यन्ते॥ अग्निस्तु आगमात्सोऽपि च स

श्री
८
8

तिब्राह्मणशरीरे तदेवाधिष्ठाय होतृत्वं करोतीति न तस्माद्भिन्ना॥ न तस्यैवं नमंतव्यं॥ यदि तावद
ग्निर्होता ततः किं मानुषेण अथ मानुषस्ततः किमग्निनेति तयोः संहत्यकारितां ख्यापनाया
ह ब्राह्मणाइति संहत्यकारित्वे विशेषमाह॥ असौ देवदत्तो यज्ञदत्तो वा मानुषो होता देवान्य
क्षच्चाद्याच्च क्षदिति वर्त्तते॥ तमग्निं यजं तमन्वयमपि यथाशक्ति आरंभमात्ररूपेण यज
तीत्यर्थः॥ एष तावत्सकाशो मंत्रार्थः॥ संस्पृष्टाउपविशतः॥ वरणानंतरं होताउन्छायाध्वर्यु
मग्नीधं चांसयोः संमृशति॥ तौ चाध्वर्यग्नीध्रौ होत्रा संमृष्टौ संतौ उपविशतः॥ अथाध्वर्युं
चाग्नीध्रं च संमृशतीति होतृकर्तृकं संमर्शनं श्रुतं॥ अग्निर्होतेति स्रुगादापनं प्रयाजेषु सं
निधेः अग्निर्होता सेत अस्रुगादायनं प्रयाजेषु भवति॥ स्रुचा वध्वर्युणा आदाप्येते नेनन पठि
तेनेति स्रुगादापनं॥ प्रयाजेष्वेवकुतः संन्निधेः प्रयाजसंनिधौ स्रुगादायनस्य पाठात्॥ अत
श्चोपशावेकादशप्रयाजो स्रुर्षपुनरुच्चारणं॥ अन्वर्थसंज्ञाविज्ञाना सर्वत्र प्राप्नोतीति तेन प्रया
जेष्विति नियम्यतां समाख्यातः संनिधेर्बलवत्वादिति॥ घृतवतीमिस्रक्ते स्रुचावदाया
तिक्रम्याश्राव्याह समिधो यजेति॥ होत्रा घृतवतीमित्येतस्मिन्नुदेउक्ते ध्वर्युः स्रुचौ जुहू
पभृतावादायातिक्रम्य वेदेः परस्माद्देशात्सरिधीन परेण सव्येन पादेन यजति देशांगत्वाश्रो
व्य समिधो यजेत्याह॥ प्रासमेवातिक्रमणमनुवाक्यापरिसंख्यानार्थमुच्यते॥ न कुतः॥ अथ
यद्पुरोनुवाक्यकाः प्रयाजाभवंतीति श्रुतेः॥ घृतवतीमध्वर्योस्रुचमास्यस्वेति तदध्वर्युप्रसौ राम
तीति श्रुतत्वाद्घृतवतीमित्यक्तइति सूचितं॥ आपस्तंबः॥ घृतवती शब्देन जुहूपभृतावाद ८

यद्दक्षिणासदादतिक्रांतोपरेणाघारसंभेदं पंचप्रयाजानाश्राव्ययजति प्रतिदिशं वा समिधः
पुरस्तात्तनूनपातं दक्षिणतः इडः पश्चाद्बर्हिरुत्तरतः॥स्वाहाकारं मध्ये सर्वान्वैकध्यमा
श्रावमाश्रावं प्रसाश्राविते समिधो यजेति प्रथमं संप्रेष्यति यतमजेतीतरानिति॥मानवे च॥घृत
वतीअध्वर्यइस्रुच्यमाने स्रुचावादाय दक्षिणाक्रामतीति॥अतएवास्माद्धुतवतीमिसेतस्मिन्मेद
उक्तेइति व्याख्यानं॥पंचप्रयाजान् सदस्तिक्रांत एव पंचप्रयाजान्यजति॥प्रयाजानिति संज्ञा आ
प्रयाजेभ्यइदंसादेशसंव्यवहारार्थाद्धुतवोपहवै प्रयाजास्तस्मात्संचभवतीति श्रुतेः॥पंचेत्युक्तं पंच
ग्रहणात्संचैतानि कर्माणीति ज्ञायते॥समिद्धतमे॥एतान्पंचप्रयाजांत्समिद्धतमेअतिशये
न समिद्धे वह्निप्रदेशे जुहुयात्॥यत्रो एव समिद्धतमं मन्येत तत्राहुतिं जुहुयात् समिद्धहोमेन ह्येव
समृद्धा आहुतयइति श्रुतेः॥अतएवोत्तमापस्तंबेन सर्वान्वैकध्यंइति॥सर्वानपि प्रयाजानेक
स्मिन्नेवस्थाने जुहुयादित्यर्थः॥यजयजेति शेषं॥समिधो यजेतेहि प्रथमे प्रयाजे उक्तं॥शेषं प्र
याजचतुष्कं प्रतियजयजेत्येव प्रैषो भवति॥अथयजयजेत्येवोत्तरानाहाजामितायै जामिह कु
र्याद्यत्तनूनपातं यजेडो यजेति ब्रूयात्तस्माद्यजयजेत्येवोत्तरानाहेति श्रुतत्वात्॥ध्रुवस्तिष्ठन्॥ध्रु
वो निश्चलः स्थिर एकस्मिन्नेव स्थाने स्तंभइवतिष्ठन्पंचप्रयाजान्यजति॥तदान्वैकस्मिन्समि
द्धतमे एवाग्नेः प्रदेशे पंचापि जुहोतीति न प्राक्संस्थान्॥स यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्त
तएव नापक्रामेदिति श्रुतेः॥नापाद्य पक्रमणकारणे सत्यपि नापक्रामेदित्यर्थः॥पश्चांतरमा
हा॥पूर्वंपूर्वं चातिक्रामं॥वा विकल्पे॥अथवाभिक्रामभिक्रम्याभिक्रम्य आहवनीयसंमुखंग

श्री मनंकृत्वा कृत्वा पूर्वं पूर्वमाक्षसंस्कृ पंस्रुमाप्पं चापि प्रयाजान्यथकस्य यस्तानेजुहोति॥ तस्मादभि
९ नराभितरामेव कामेदभि इत॥ रामभितरामाहुतीर्जुहुयादिति श्रुतेः॥ तस्मात्प्रयाजाः प्रांचो
हूयंत इति श्रुतेश्च॥ तेन ध्रुवपक्षे सपिंडतम एव पंचानामपि होमः॥ अभिक्रमणपक्षे न पू
र्वं पूर्वमिति॥ आक्षसंस्कृ पंचमे सर्थः॥ स वै यजति होमर्दशानादशमुखेन वेदेर्दक्षिणभागे
व्यवस्थितेन कर्तव्यः॥ वषट्कारेण सह वा वषट्कृते वेति॥ तदुक्तं दक्षिणत उदङ् प्राङ् च वष
ट्कृते सह वेति॥ मनुः॥ जुहूमुपभृतोग्रेणादध्यादुद्धरेच॥ दक्षिणेन दक्षिणातिक्रामवि
सव्येनोदङ्॥ परिधी संधीनान्ववहरा आसीन उत्तरतो जुहोति स्वाहाकारवतीर्वषट्कार
वतीर्दक्षिणतः प्राङ् दशमुख ऊर्ध्वस्तिष्ठन्नाघ्याय्यन [illegible] होमास्समंप्रति वषट्कारं वषट्कृ
ते जुहोति मंद्रेण स्वरेणाज्यमागाभ्यां प्रचरति मध्यमेनानुयाजेभ्य उत्तमेनाज्यं योरिति॥ उपभृ
तो जुह्वामानयसनवमृज्यांश्चतुर्थं॥ उपभृति गृहीतस्य मध्ये द्वाज्यस्य प्रयाजार्थत्वात् चतुर्थं प्र
याजं प्रस्रुपभृतः सकाशादर्द्धमाज्यं जुह्वामानयति॥ आसिंचति॥ किं कुर्वन् अनवमृशन् उपभृता
जुह्वाः स्पर्शमकुर्वन्॥ अथ चतुर्थे प्रयाजे समानयति बर्हिषि इति प्र [illegible] स्रुचावनवमृशन्समा
नयतीति श्रुतेः॥ अत्राहापस्तंबः॥ त्रीनिष्टार्ध्वमोपभृतस्य जुह्वामानीय प्रसाकम्याच्छेषेण ध्रुवा
मभिधार्यानुपूर्वं हवींष्यभिधारयस्रुपभृतमंतत इति॥ काठके॥ त्रीनिष्टोपभृतस्यार्धं जुह्वामा
सिच्यते नोत्तराविष्टा प्रसाकम्याभिधारयति ध्रुवा [illegible] हवींष्युपभृच्छेषमिति॥ एवं प्रयाजो॥ प्र राम
याजप्रयोगावेवमेव समानयनकार्यं च॥ एवमिति चतुर्थे चतुर्थे इत्यर्थः॥ तथैवमुनताः॥ तथा ९

हि वरुणप्रघासेषु ॥ चतुर्थे प्रयाजे समानयमानो न वर्भिः प्रयाजेभ्य रतइति ॥ पश्चादपि ॥ चतुर्थे
चतुर्थे प्रयाजे समानयमानो द्वाभ्यांभिः प्रयाजेभ्य रतीति ॥ ततश्चैवं ॥ चतुर्थे समानीय चतुर्थमा
रभ्य पुनश्चतुर्थे ससमेद्दसर्पः ॥ पुनश्च ससममारभ्य चतुर्थे द्वामेद्दसर्पः ॥ अत एव याज्ञिका व
दंति ॥ चतुर्थ ससमदशामेषु समानयनमिति ॥ अनुयाजेषु च ॥ अनुयाजेष्वपि त्रयं द्वौ एवं ज्ञेयं
चतुर्थे चतुर्थे समानयनं कार्यमिसर्पः ॥ तत्रापि स्रुयते ॥ वरुणप्रघासेषु तावत् ॥ चतुर्थे च तु
र्थेनुयाजे समानयमानो न वर्भिरनुयाजेभ्य रतइति ॥ पश्चादनुयाजेष्वपि चतुर्थ ससमदशमे
षु समानयनं शाखांतरात् ॥ उत्तरां जुहूमपसृत्य प्राचीमवहस्य जुहोति ॥ जुहूमुत्तरामेवापरिमार्ग
णेव प्राचीमवहस्य उपभृद् ग्रेणावतार्य जुहोति प्रथमं प्रयाजं ॥ पुनरप्युपभृत्येनैव मार्गेणो
पभृत उपरि भिधाय पुनस्तथैवावहस्य जुहोति ॥ एवं प्रतिप्रयाजं ॥ न सकृदवतारितव्यास र्वानि
ति अथातो होमस्यतंत्रे तदेके कुशला मन्यमानाः प्राचीं स्रुचमुपावहस्य उत्तापर्याहृ सोपभृ
स्यधिनिदधतीति प्रविज्ञाय पार्श्वेन तउहैके स्रुचमुपावहस्य उत्तापर्याहृ सोपभृस्यधिनिदधती
ति प्रतिसेकोयं पक्षमुपन्यस्य न तथा कुर्यादित्यादि निंदित्वा रन्छमेव कुर्यात् प्राचीमेव स्रुचमुपा
हस्य उत्तानेनैवाधिहसोपभृस धिनिदध्यादिति स्वपक्षस्थापनात् ॥ तेनोपभृद्दग्रप्रदेशेनैव
जुह्वा अवहरणाद्यूहनेकार्यं न पार्श्वमार्गेणेति सिद्धं ॥ अत एवोक्तं मनुना ॥ जुहूपभृतोऽग्रेणा
दध्याद्दक्षिणेनेति आपस्तंबोपि ॥ मुखतो भिहस्य मुखतउपावहरतीति सर्वत्रैवमसाधानोपाव
णामवतो न च संहिजयतीति ॥ एवं सर्वत्र ॥ न केवलं प्रयाजेषु सर्वत्र सर्वहोमेष्वेवं ज्ञेयं ॥ यत्तो

श्री
१०

होममात्रं प्रवृत्तस्य भूयते ॥ अथातो होमस्येति न प्रयाजान्प्रवृत्तस्तस्मात्सर्वत्रानुवृत्ता अवतारणा
ध्यूहने प्रतिहोमं भवत्येव ॥ प्रयाजेष्वन्यत्र चेति सिद्धं ॥ ५ ॥ नाभिदेशे धारणं ॥ अध्वर्युर्नाभिदे
शे नाभिसमीपे स्रुचोर्जुहूपभृतोर्धारणं कुर्यात् अथातो धारणस्येति प्रवृत्तस्याथ हेषमध्यमः
प्राणस्तस्मादुत्तमप्युपन्यस्यैव वषधारयेदिति श्रवणात् ॥ वषट्कारान्ते होमविधानाद्वषट्कारा
सती क्षणीयं तत्रानियमेन स्रुचोर्धारणे प्राप्ते नियमोऽयं नाभिदेशे धारणमिति ॥ प्रगृह्य
बाहू स्रुचोर्धारणं त्वर्थवादत्वान्न सूत्रितं ॥ एवमेव मन्त्रब्राह्मणे तदुक्तं यथा न कुर्यादित्येवं
निषिद्धाः पक्षाः सर्वे अर्थवादा ज्ञेयाः ॥ प्रयाजानुमन्त्रणं ॥ अभिधास्यत इत्युत्क्षेपः ॥ प्रया
जानां प्रत्येकमनुमन्त्रणं अभिधास्यते ॥ तदेवाह ॥ एको ममैका तस्य योस्माद्द्वेष्टि यं च वयं द्वि
ष्म इत्येवं मिथुनैर्यथासंख्यं ॥ एको ममैका तस्य योस्मानित्येवं मिथुनैः एवं प्रकारैर्यथासंख्यं
मिथुनैः स्त्रीलिंगपुंलिंगशब्दवद्भिर्मन्त्रैः क्रमेण प्रयाजानामनुमन्त्रणं करोति ॥ किमुक्तं भव
ति ॥ यथा एकः एकेति मिथुनं प्रथममुक्तं ॥ यथासंख्यं मिथुनैरित्युक्तत्वादेवं शब्दाध्याहारो ॥ द्वे ॥
त्रयः ॥ तिस्र ॥ चत्वारश्चत्वारि तस्मादित्येतदुक्तं भवति ॥ तथैव श्रूयते ॥ तस्मात्प्रथमे प्रयाज इष्टे ब्रू
यादेको ममैका तस्य यमहं द्वेष्मीति यद्युत द्विष्याद्योस्मान्द्वेष्टि यं च वयं द्विष्म इति ब्रूयाद्द्वे म
मेति द्वितीये प्रयाजे द्वे तस्य योस्मान्द्वेष्टि यं च वयं द्विष्म इति त्रयो ममेति तृतीये प्रयाजे तिस्रस्त
स्य योस्मान्द्वेष्टि यं च वयं द्विष्म इति चत्वारो ममेति चतुर्थे प्रयाजे चतस्रस्तस्य योस्मान्द्वेष्टि यं च राम
वयं द्विष्म इति ॥ न तस्य किंचनेति पंचमे ॥ पंचमे प्रयाजे पंच ममेत्यस्यानन्तरं न तस्य किंचन १०

यो स्मान्द्वेष्टीतिमंत्रेणानुमंत्रणं कुर्यात्॥ पंचममेति पंचप्रयाजेनेनतस्य किंचन यो स्मान्द्वेष्टि पंचव
पंद्विष्मइतिश्रुतत्वात्॥ एतच्चानुमंत्रणं सागानंतरं हविःप्रक्षेपे च कृते कर्तव्यं॥ सागाश्चामां
त्रवर्णिकीभ्यः समिदादिदेवताभ्यः कार्यः॥ प्रथमे इदं समिद्भ्यो न मम॥ एको ममेसादि॥ द्वितीये
इदं तनूनपाते नराशंसाय वा॥ न मम द्वौ मम तस्येति तृतीये इदं मिड्भ्यो न मम त्रयो ममेसादि
चतुर्थे इदं बर्हिषे न मम चत्वारो ममेसादि॥ पंचमे॥ इदमग्नये सोमायाग्नये ग्नीषोमाभ्यामग्नी
षोमाभ्यां देवेभ्य आज्यपेभ्यो न मम पंचममेसादि॥ अमावास्यायां तु इदमग्नये ग्नीषोमाभ्या
मिंद्राय देवेभ्य इति संनयतः॥ अग्नये विष्णवे इंद्राग्निभ्यां देवेभ्य इत्यसंनयत इति॥ त्विषिमान
पचितिमान्यशस्वी ब्रह्मवर्चसन्नाद इति च॥ चकारः पूर्वोक्तानुमंत्रणैः सह समुच्चयार्थः॥ य
थासंख्यमित्यनुवर्तते॥ त्विषिमानित्यादिभिः पंचभिर्मंत्रैर्यथासंख्यं पंचप्रयाजाननुमंत्रयेत॥
प्रथमेन प्रथमं॥ द्वितीयेन द्वितीयमेवमापंचमादिति यथासंख्यार्थः॥ अत्र सा५कांक्षत्वाद्भूया
सामिति प्रतिपदमध्याहारः त्विषिमान्भूयासमित्येवं॥ स च श्रुतौ पठित एव॥ ब्राह्मणे सकलाना
मानामंत्राणामादिमात्रेण निर्देशो घटत एव॥ व्यवहितानामपि चानुमंत्रणानां पाठदेवक्र
यः समुच्चयस्याकरणत्वात्॥ स प्रथमं प्रयाजमनुमंत्रयेत त्विषिमान्भूयासमित्यपचितिमा
न्भूयासमिति द्वितीयं यशस्वी भूयासमिति तृतीयं ब्रह्मवर्चसी भूयासमिति चतुर्थमन्नादो
भूयासमिति पंचममिति॥ श्रुतत्वात्॥ पूर्वस्मादनुमंत्रणादिदं भिद्यते॥ एतद्विधानात्॥
प्रयोजनं सावसानं द्वयोः प्रयोगः॥ अनेके यजमानके तु कृतत्वादनुमंत्रणमेकच एव करोति॥

श्री ११ तत्रएकोममेस्या॥ ह्यूहाभावः॥ आन्नीयोगाभावात्॥ त्विषिमानिस्यादीनुऊहो भवति॥ आ
शीर्योगात्॥ त्विषिमंतौ भूयास्वेति द्वियजमानके॥ त्विषिमंतो भूयास्मेति बहुयजमानके
एवं सर्वत्र॥ आगंतूनां चतुर्थपंचमाभ्यामूर्ध्वं स्थानात् चातुर्मास्येषु प्रयोगे च प्रयाज प्रवृत्तौ च
तुर्थपंचमयोरंतराले आगंतवो द्वारादयः इज्यंते॥ तत्रानुमंत्रणहोमस्थानादिधर्मजातं प्र
तिसंदेहः॥ आगंतूनां किं यस्य कस्यचित्प्रयाजस्य धर्माः॥ उत नियमनेति॥ किं तावत्प्राप्तं
प्रयाजत्वसामान्यस्याविशेषाद्यस्य कस्यचिदिति प्राप्त आह॥ आगंतूनामिति॥ आगंतूनां
प्रयाजानां चतुर्थपंचमयोर्मध्ये आगंतवः पठ्यंते॥ अतस्तत्संनिधानाच्चतुर्थपंचमयोरे
व धर्मा आगंतुषु भवंतीति॥ यतो धर्मापेक्षायां सन्निहितव्यतिक्रमे कारणं नास्ति॥ प्रथमच
तुर्थाभ्यां वा यथालिंगं॥ अथवा यथालिंगं प्रथमचतुर्थाभ्यां प्रथमाच्चतुर्थाच्चागंतूनां धर्मा
५ भवंति॥ यथालिंगमिति यो मे कदेवसत्त्वस्य प्रथमधर्मः॥ यस्त्वेकदेवसत्त्वस्य चतुर्थधर्मा इति
तेन पंचमषष्ठाष्टमानां प्रथमस्य धर्माः॥ अनेकदेवसत्त्वान सद्यमनवमदशमा-नां चतु
र्थस्य धर्माः॥ तेषामेकदेवसत्त्वात्॥ लिंगमेवात्र धर्माणां पर्युपस्थापकं॥ ननु द्वितीयस्यै
कदेवतस्येन तृतीयस्य बहुदेवतत्वेन लिंगस्याविशिष्टत्वात् द्वितीयतृतीयाभ्यां सकाशा
धर्मा आगंतुषु कुतो न भवंति॥ सत्यं॥ लिंगमविशिष्टं॥ परंतु प्रथमचतुर्थयोरन्यदपि कारण राम ११
मस्ति॥ एकत्र प्राप्तस्याभितरत्रानंतर्यं॥ अथ सिद्धांतमाह॥ सर्वान्तमेनोपायित्वात्॥ अथवा स
वानागंतूनुत्तमेनोत्तमप्रयाजधर्मेण संबध्नीयात्॥ योजयेत्॥ कुतः॥ उपायित्वादागंतूनां॥

यतस्तं पंचमप्रयाजमागंतवउपयंति उपगछंति चतुर्थस्तु स्वस्थानएवभवति॥ पंचमेनपुनरनन्त
रितेआगछंतआगंतवस्तस्यपंचमस्यस्थानेभवति॥ तस्थानात्वं तद्धर्मता तेषांन्याय्याअत
एवतस्यैवोत्तरस्याभ्यासेनविकृतिषु नवसंख्यैकादशसंख्या चश्रूयमाणाप्रयाजानांपूरणीया॥
यतः पंचप्रयाजान्यजतीतियं पंचसंख्याप्रयाजानामुसन्निशिष्टा॥ नवप्रयाजान्यजैसेका
दशप्रयाजान्यजतीतीयं वैकृतीसंख्याचोसन्नशिष्टा॥ उसन्निशिष्टायाश्च पंचसंख्यायाउस
न्नशिष्टयानवैकादशसंख्यया बाधायोगाद्वैकृतीसंख्याभ्यासेनैवपूरणीया॥ तत्राभ्यासेव
स्यं कर्तव्ये न्यायात्संचमस्यैवाभ्यासः प्राप्नोतियतः पूर्वेषामभ्यासोनयुज्यते तत्स्थानेआगंतू
नांपाठाभावात्॥ तस्मात्संचमस्यैवायमभ्यासस्तेन तद्धर्माएवागंतुषुभवंतीतिसिद्धांतः॥ अ
तश्च द्वाःप्रभृतीनांपंचमस्यस्थानेहोमः पंचममनंतस्यैसाद्यनुमंत्रणंअन्नादोभूयासमिति
चसर्वेषांभवतिअभ्यासविनाशेचसोऽभ्यासः पंचमआवर्त्तते आध्वर्यवंकुर्वेतिगदाधरक
र्काचार्याः॥ विनष्टस्यैवैकस्यावृत्तिरितियाज्ञिकाः॥ अनुयाजेषुसमिष्टयजुःषुअनुवंध्या
सुचैवमेवद्रष्टव्यं॥ द्रव्याभावेचद्रव्यमप्युत्सादनीयं॥ अत्रयद्यपिशतपथेअविशेषेणश्रुतं॥ अ
थतनूनपातंयजतीति॥ परंतुशाखांतरेविशेषःश्रूयते॥ राजन्यात्रिवध्र्यश्ववसिष्ठवैन्यशु
नकानांकण्वकश्यपसंकृतीनांनराशंसोद्वितीयःप्रयाजस्तनूनपादन्येषामिति॥ एवंमानवसू
त्रेपि॥ तत्राविशेषस्यविशेषविशेषपरत्वमेवन्याय्यं॥ तेनैवंव्यवस्था॥ राजन्यवसिष्ठादीनांनरा
शंसएवद्वितीयःप्रयाजः॥ अन्येषांतनूनपादेव॥ वसिष्ठादिकंगोत्रंयेषांतेवसिष्ठादयइतिके

श्री षिष्ठाः॥अन्येतुवसिष्ठादिप्रवरंवतोवसिष्ठाइति॥येतुकाश्यपसगोत्राःकश्यपप्रवरंतन्मते
१२ भव२ षांचनिःसंदिग्धंनराशंसएवेति॥एतस्तुक्काभिधारणंध्रुवायाहविषउपभृतश्च॥पंचमंप्रया
जहोमानंतरंयजतिस्थानादेसवेदेःपश्चादागत्योपविश्यजुह्वाकरणभूतयानन्तरेनैवप्रयाज
शेषेणध्रुवायाइतिध्रौवस्याज्यस्य॥हविषइत्येसेस्तात्याज्यस्यपुरोडाशस्याश्चोपभृतश्चेस्क
पभृच्छस्यायुरभिधारणंकरोति॥उपयोगक्रमेण॥सयज्जुह्वामाज्यंपरिशिष्टमासीद्येनप
ज्ञाण्समस्तापयंस्तेनैवयथापूर्वंहवींष्यभ्युधारयन्तितिप्ररुत्ससत्स्मादुत्तमंप्रयाजमिष्ट्वा
यथापूर्वंहवींष्यभिधारयति॥पुनरेवैतानिनदाप्यायपसुपातयामानिकरोतीतिश्रुतेः॥
अयंचहविःसंस्कारोनप्रयाजशेषप्रतिपत्तिः॥कुतः॥श्रुतिवाक्येहवींषीतिद्वितीयपाहवि
षांसंस्कार्यत्वावगमात्॥शेषेचत्वतीयाश्रूयते॥तेनैवयथापूर्वमिति॥शाखान्तरेपिप्रयाज
शेषेणहविष्यभिधारयतीत्येवमेवश्रूयते॥अतोहविःसंस्कारएव॥पुनरेवैनानितदाप्याय
यसयातयामानिकरोतीतिवाक्यशेषाच्च॥अतःसन्निहितानिसर्वाणिहवींषिशेषेणाभिधा
रणीयानि॥शेषविनाशेतुद्रव्यमात्रमुसाघनेनाभिधारणीयानि॥प्रयाजशेषप्रतिपत्तिरि
यमितिकर्काचार्याः॥आज्यभागाभ्यांचरत्साग्नेयेनसोम्येनआज्यभागाविसनयोःसंज्ञासंप्र
न्ताराथा॥ताभ्यामाज्यभागाभ्यांचरतिनावत्तिष्ठतीत्यर्थः॥किंदेवत्सोताबाज्यभागाविसा राम १२
कांक्षायामाह॥केनाग्नेयेन॥अपरेणासोम्येन॥अग्निर्देवतायस्यतदाग्नेयं॥अग्नेर्ढक्॥सोमो
देवतायस्यतत्सौम्यं॥सोमाद्यण्॥अग्नेयंद्व्यं॥यस्मिन्नाज्यभागेसआग्नेयः॥एवंसौम्योपि

चतुरवत्तस्य वषट्कारास्तु॥ स वषट्कारास्त्वाहुतिषु चतुरवत्तं होतव्यं॥ तद्धि चतुरवत्तं भवतीदं
द्वा अनुवाक्या याज्याथ वषट्कारो यत्सा देवता चतुर्थस्य देवतायैह हविर्भवतीत्यादिनास
वषट्कारान्त्याहुतिषु चतुरवत्तश्रवणात्॥ अनिधायावदायावदाय ध्रुवामभिघारयत्याप्याययता
मिति॥ स्रुचावनिधाय हस्तद्वयं तयोरेव न योर्जुह्वा ध्रुवात आज्यमवदायावदाय आप्यायतामि
ति मंत्रेण स्थालीतो ध्रुवामाप्याययति यद्वं तं न सूरमति॥ आज्यभागाविति अन्वर्थसंज्ञयैषा
ज्यद्रव्यकत्वमवगतं॥ तच्चाज्यं ध्रुवाया एवावदेयं॥ आहवनीय यजतयो ध्रुवायाद्दतिपरिभाषा
यामुक्तत्वात्॥ तेनास्य सवदानमनेन सूत्रेण ध्रुवाया आप्यायनं विधीयते॥ तत्रावदायावदाये
ति वीप्सा प्रतिस्रुवमाप्यायनविधानार्था अन्यथा चतुरवदानां तेसकृदाप्यायनं प्राप्नोति॥ तच्च
नोपपद्यते मूलक्षयात्॥ तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजति॥ साज्यभागयोर्यजतित्वान्नि
ष्ठद्धोमा वषट्कारप्रधाना याज्यापुरोनुवाक्यावन्तो यजतयः स्रुक्स्त्वाद्याज्यापुरोनुवाक्यावत्तां॥
तां चानुवाक्यां याज्यां च प्रेषित एव होता पठति संप्रेषितो न्वाह न था यजतीति शांखायनोक्तः॥
ततश्चानुवाक्यापाठनार्थमग्नयेनुब्रूहीत्येवं प्रेषः कर्तव्यः॥ अनुवाचनप्रेषो यथादेवतममुष्मा
अनुब्रूहीति परिभाषितत्वात्॥ आश्रावणानंतरं चाग्निं यजेति॥ एवं प्रेषः कार्यः॥ तद्युक्तमा
श्राव्य प्रेषे चामुं यजेति॥ अनुवाक्याप्रेषश्चावदानात्प्राग्नेयः॥ वरुणप्रघासेवदानात्पूर्वमेवद
र्शनात्॥ अथाध्वर्युरेवाहाग्नयेनुब्रूहीत्याग्नेयमाज्यभागं तावुभावेव चतुराज्यस्यावदायाति
क्रामसतिक्रम्याश्राव्याहाग्निं यजेति तावुभावेव वषट्कृते जुहुतइति॥ एवं सर्वयागेषु विज्ञेयं

श्री १२ अतश्च सर्वयागेष्वयं क्रमः॥ पूर्वमनुवाचनं॥ ततोवदानं॥ ततोतिक्रम्याश्राव्ययाज्यार्थः॥ प्रैषइति॥
यत्तु वाजिनेयश्च यागेष्ववदानोत्तरकालमनुवाचनं तद्वचनात्॥ पशुपुरोडाशयागे वपायागेष्वा
13 वभृथे वारुणयागे सवनीययागे च वचनात्सहानुवाचनं अवभृथस्विष्टकृद्यागे च यत्तु तत्पुरोडा
शाद्दोषमवदाय ततोनुवाचनं तदपि च वचनादेव॥ अन्यत्र यजतिमात्रे पूर्वमेवानुवाचनमिति॥
अत्राहापस्तंबः॥ आग्नेयः सौम्यश्चाज्यहविषावाज्यभागौ चतुर्गृहीताभ्यां जमदग्नीनां तु पंचा
वत्त॥ मध्ये जामदग्न्यो जामदग्न्यमाभग्न्यपंचावत्तं कुर्वन् तसर्वत्रावघ्नन्मुख्या अनुब्रूहीति पुरोनु
वाक्यां संप्रेष्य सवदायावदाय स्रुवेण प्रस्तरबर्हिः॥ समज्य जुहूपभृता वादाय दक्षिणातिक्र
म्याश्राव्य प्रसाश्रावितमुयजेतिया ज्यामिति सार्वत्रिकमिति॥ मानवेन॥ असातिक्रम्याभिघारयति॥
ध्रुवां दक्षिणं पुरोडाशं पुनश्चषायां पुयाजायोत्तरं पुरोडाशं सायं दोहं प्रातर्दोहं मुपस्तनमंततः
स्रुवेणावद्यति चतुः॥ पंचकृत्तो जामदग्न्यस्यैक मयं चावत्तं जामदग्न्यमामं प्रकुर्वन् ताज्यभागौ यज
तीति॥ अनुब्रूहीत्युक्ता नापव्याहरेन्नोधारयेत्॥ न केवलमध्वर्युर्होता च॥ होताप्याश्रावणं या
वन्नापव्याहरेत्॥ एतस्मात्प्रैषादयनंअतिरिक्तं किमपि न व्याहरेन्नोधारयेत्॥ अनुवाक्यातिरिक्तं
किमपि न ब्रूयात्॥ सोनुब्रूहीत्येवोक्ताध्वर्युर्नापव्याहरेन्नो एव होता नापव्याहरेदिति श्रुतत्वात्॥
आश्रावितेग्नीदाप्रसाश्रावणात्॥ आश्राविते सत्यग्नीन्नापव्याहरेदाप्रसाश्रावणात्प्रसा राम् १२
श्रावणं यावत्॥ अस्तु श्रौषडिसेतस्मात्परं किमपि न वदेदिति सूत्रार्थः॥ सोग्नीन्नापव्याहरेदा
प्रसाश्रावणादिति श्रुतेः॥ अस्तु श्रौषडिसस्य प्रसाश्रावणसंज्ञा॥ प्रसाश्रावयस्यग्नीदिति

वचनात्॥ प्रत्याश्राविते ऽध्वर्युर्होतृप्रैषात्॥ अग्नीध्रः अस्तु श्रौषडित्येवं प्रत्याश्राविते सत्यध्वर्यु
र्होतृप्रैषान्नापव्याहरेत्॥ यजेत्येवं होतृप्रैषः॥ तद्व्यतिरिक्तं किमपि न व्याहरेदित्यर्थः॥ सोऽध्व
र्युर्नापव्याहरेद्धायजेति वक्तोरिति श्रुतेः॥ वक्तोवचनादित्यर्थः॥ होतावषट्कारात्॥ यजेति प्रैष
श्रवणानन्तरं होता आ वषट्कारान्नापहरेत् याज्यावषट्कारव्यतिरिक्तं किमपि न वदेदित्यर्थः॥
स होता नापव्याहरेदावषट्कारादिति श्रुतत्वात्॥ अत्राहापस्तम्बः॥ अनपव्याहरन्तः प्रचरन्त्या
श्रावयिष्यन्नान्यदाश्रावणाद्ब्रूयादाश्राविते नान्यदाग्नीध्रः प्रत्याश्रावणात् प्रत्याश्राविते नान्य
दध्वर्युर्यजेति वचनाद्यजेत्युक्ते होता नान्यद्वषट्काराद्यदन्यद्ब्रूयात्पुनरेवाश्रावयेद्व्याहृतीर्वा
जपेदिति॥ प्रसंगादाह॥ सोमे च ग्रहं गृहीत्वोपाकरणात् सोमे सोमयागे ज्योतिष्टोमे ऽध्वर्युर्ग्र
हं गृहीत्वा आ तत्स्तरणाथ्यां ग्रहमुपस्थस स्तोत्रोपाकरणान्नापव्याहरेत्। उपावर्तध्वमित्येवं स्तो
त्रप्रैष उपाकरणशब्देनोच्यते॥ तद्व्यतिरिक्तं किमपि न व्याहरेदित्यर्थः॥ इति तु हविर्यज्ञेष्व सोम्ये
ध्वरे त्वेनं ग्रहं गृहीत्वाध्वर्युर्नापव्याहरेदोपाकरणादुपावर्तध्वमित्येवाध्वर्युरुद्गातृन्प्रोपयत्त ॐ
संप्रयच्छ। नीति॥ उपाकृते उद्गातार आ होतृप्रैषात्॥ उपाकृते ऽध्वर्युणोपावर्तध्वमित्येवं स्तो
त्रोपाकरणे कृते उद्गातारो नापव्याहरेयुः स्तोत्रव्यतिरिक्तं किमपि नोच्चारयेयुः॥ आ होतृप्रैषात्
एषोत्तपोसयं प्रस्तोतः कोहोतृप्रैषः॥ तस्यान्तमित्यर्थः॥ प्रस्तोता हि सर्वेषु स्तोत्रेषु उत्तमाया
ऋच्यः॥ प्रस्तावादनन्तरं स्तोत्रकर्तारं प्रेष्यति एषोत्तमेति॥ न उद्गातारो नापव्याहरेयुरोत्त
मायाः एषोत्तमेत्येवोद्गातारो होत्रेपत्त ॐ संप्रयच्छन्तीति॥ होतावषट्कारात्॥ होता आवषट्कारा
न्नापव्याहरेत्॥ शास्त्रव्यतिरिक्तं किमपि न व्याहरेदित्यर्थः॥ स होता नापव्याहरेदावषट्का

श्री १४ रादितिश्रुतेः॥ होतृग्रहणमन्येषामपिऋत्विक्कर्तॄणामुपलक्षणार्थं तेन प्रशास्त्रादयोपि
षोत्तमेतिशेषं श्रुत्वानापव्याहरेयुरावषट्कारात्॥ आग्नेयमुत्तरपूर्वार्द्धे॥ आग्नेयमाज्यभा
14 गमाहवनीयस्योत्तरपूर्वार्द्धे ईशानभागे जुहोति॥ उत्तरार्द्धपूर्वार्द्धे हैक आग्नेयमाज्यभागं
जुहुतीतिश्रुतेः॥ दक्षिणपूर्वार्द्धे सौम्यं॥ सौम्यं सोमदेवत्यमाज्यभागं दक्षिणपूर्वार्द्धे आहव
नीयस्याग्नेयभागे जुहोति॥ दक्षिणार्द्धपूर्वार्द्धे ह्व सौम्यमाज्यभागमितिश्रुतेः॥ समिद्धतमे
वा॥ अथवोभावप्याज्यभागौ समिद्धतमे अतिशायेन समिद्धे प्रदीप्ते ज्वालावत्याहवनीय
प्रदेशे जुहुयात् यत्रोएव समिद्धतमं मन्येत तत्राहुतीर्जुहुयादितिश्रुतेः॥ सम्यगिद्धो दीप्तः
अतिशयेन समिद्धः समिद्धतम इति॥ हविर्ष्यां च॥ चरतीति शेषः॥ चकारेण समिद्धतम इत्येतदनुकृ
ष्यते॥ हविर्ष्यां च समिद्धतम एव वह्निप्रदेशे प्रचरति॥ यत्रोएव समिद्धतमं मन्येत तत्राहु
तीर्जुहुयात् समिद्धहोमेन ह्यैव सम्पन्ना आहुतयः इतिश्रुतेः॥ पुरोडाशावंतरेणा(गा)ग्नीषोमावुपां
श्वाज्यस्य॥ पुरोडाशावंतरेण पुरोडाशसाध्ययोर्यागयोरंतराले मध्ये आज्यस्य द्रव्यस्योपां
श्वग्नीषोमौ यजति अंतरे संपन्निपातो मध्यार्थः॥ तद्योगेन अंतरांतरेण युक्त इत्यनेन पु
रोडाशाविस्रुपपदविभक्तिर्द्वितीया॥ ततश्चायं क्रमः॥ पूर्वमाग्नेयमाज्यभागो ध्रुवातश्च गृ रामू १४
हीतेन ततएवमेव सौम्य आज्यभागोपि॥ तत आग्नेयेन पुरोडाशेन यागः॥ तत्राग्नयेनुब्रूहि
सत्तु वाचनं॥ ततो जुह्वा ध्रुवायाः स्रुवेणाज्यं गृहीत्वोपस्तारः॥ आज्यस्थाल्याः सकाशाद्ध्रुवाया

अभिघारणं॥ततः पुरोडाशस्य मध्यादंगुष्ठपर्वमात्रं तिरश्चीनमवदानं ग्राह्यं॥द्वितीयं पूर्वा
र्द्धात्॥पंचावत्तिनस्तृतीयं पश्चार्द्धात्॥ततो ध्रौवेणोपर्यभिघारः॥पुनर्ध्रुवायाआप्यायनं॥
आज्यस्थाल्याज्येनावत्तस्य हविषावदानयोः प्रसभिघारः॥अतिक्रम्याश्राव्याहाग्निं यजेत्युक्त्वा
वषट्कृते सह वा स्रुक्क्याभ्यर्वेन ज्ञम:॥ततआज्यभागवद्ध्रुवानश्चतुः पंचकृत्वो वावदायोपांशु
याजः॥ततआग्नेययागवद्द्वितीयेन पुरोडाशेनाग्नीषोमीययागस्ततः स्विष्टकृदिति॥तदाहाप
स्तंबः॥स्रुचावाज्येन निदधात्स्विष्टकृत आज्यभागावंतरेणोत्तराआहुतीर्जुहोति प्रसाक्रम्य
जुह्वामुपस्तीर्य मानेरि साग्नेयस्य पुरोडाशस्य मध्यादंगुष्ठपर्वमात्रमवदानं तिरश्चीनं मवद्य
ति पूर्वार्द्धाद्द्वितीयमनूचीनं चतुरवत्तिनः पश्चात्तृतीयं पंचावत्तिनो संभिदन्मांससहिताभ्यामंगु
लीभ्यामंगुष्ठेन च पुरोडाशस्यावद्यति स्रुवेणाज्यसान्नाज्ययोरिति॥तथावदानान्यभिघार्य ह
विःप्रसभिघार्याग्नयेनुब्रूह्याग्निं यजेति संप्रेषाविति॥तथा॥यदावीतान्विलेंकायतीवाग्निरथा
हुतिर्जुहोति आज्यहविरुपांशुयाजः पौर्णमास्यामेव भवति नैवेष्ठ वोग्नीषोमीयः प्राजापत्यो
वा प्रधानमेवोपांशु विष्णुं वभूषन्यजस्यग्नीषोमौ प्रातव्यवानाग्नेयवदुत्तरे हविर्भिर्यथादेवतं प्र
चरति सामवदायदोहाभ्यां दध्नो वदायमत्तस्यावद्यसे तद्धा विपरीतं सर्वाणि द्रवाणि स्रुक्ष्ण स्रुवेण
न जुहोतीति॥मानवे च॥उपस्तीर्य दक्षिणस्य मध्यात्संहताभ्यामंगुलीभ्यामंगुष्ठेन चांगुष्ठपर्वमा
त्रान्यवदानान्यवद्यति मध्यात्पूर्वार्द्धाद्द्वितीयं पश्चार्द्धात्तृतीयं यदि पंचवदानः स्यादवदनमभि
घार्य पुरोडाशं प्रसभिघारयति अग्नयेब्रूहीत्यनुवाचयत्याश्राव्याग्निं यजेति प्रेष्यसंतराज्यमा

श्री ९५ 15 गावाहुती आगुदीच्वीरपामातइमति ध्रौवस्यावघोपांशुयाजावदग्नीषोमीयं पौर्णमास्यां वै
ष्णवममावास्यायामुपांशुदेवतेनिर्दिष्टास्ते वमुत्तरस्यावदानपथादेवतं प्रचरति संनयतस्तु
पस्तीर्य यथावदानं समवद्यति पुरोडाशस्य दोहयोश्चो द्यायानुब्रूहीत्यनुवाचयति महेन्द्रायेति
वा सांनाय्यचरुपुरोडाशानां पार्श्वेन जुहुयात्तद्द्वाणांप्रस्रवणेन व्याख्यातं॥ प्रचरणमिति॥
विष्णुर्वामावास्यायां होत्राम्नानात्॥ अमावास्यायां विष्णुर्वा उपांशुयाजस्याज्ययागस्य देवता
भवति॥ अग्नीषोमौ वेति कुतः होत्रस्नानात्॥ एवं हि होत्रे आम्नायते॥ वैष्णवमन्वेदिदं विष्णुर्वि
चक्रमे विष्णुवासद इति याज्यापुरोनुवाक्ये इति व्यवस्थितोयं विकल्पः॥ संनयतोग्नीषोमौ असंन
यतो विष्णुरिति होतृवशादेव॥ तथा च शांखायनः॥ उभयत्राग्नेयः पुरोडाशोग्नीषोमीय उपांशु
याजो वैष्णवो वाग्नीषोमीयश्च पुरोडाशः पौर्णमासे हविषि॥ ऐन्द्राग्नो संनयतो द्वितीयो मावास्या
मैन्द्रं सान्नाय्यं संनयतो माहेन्द्रं वा वैष्णवं त्वसंनयतस्तु पांशुयाजमिति॥ अत्रामावास्यायामिसनु
वर्तते॥ तुराद्वोव्यवस्थितविकल्पार्थः॥ तेनामावास्यायां सान्नाय्ययाजिनोग्नीषोमाविज्यते अ
सान्नाय्ययाजिनो विष्णुरिति॥ आश्वलायनोपि॥ आवाहने॥ अग्निमावह॥ इति तु प्रथमदेवताम
ग्निं सोममित्याज्यभागावग्निमग्नीषोमावितिपौर्णमास्यामग्नीषोमयोः स्थाने इन्द्राग्नी अमावा
स्यायामसंनयतः इन्द्रं महेन्द्रं वा संनयतो तरेण हविषी विष्णुमुपांश्वैतरेयिणोग्नीषोमीयं पौ राम
र्णमास्यां वैष्णवममावास्यायामेके॥ नैकं कंचनेति॥ तथा॥ उपांशुयाजधर्माः शांखायनेनो ९५
क्ताः प्रणवोयेयजामहे वषट्कारः संप्रैषाः प्रैषाश्चाश्चैरुपांशु हविः शुद्देवता नामधेयं

च्चोपांश्चिति॥ तद्यदुपांशुयाजं कुर्वसे को॥ नैकइतिश्रुतेरुपांशुयाजस्य विकल्पः॥ अतएवाश्व
लायनेनोक्तं नेनोक्तं नैके कंचनेति॥ न्यायेन ब्राह्मणे चाविशेषः॥ अथ यदमावास्यायामिंद्राग्नी
यजति प्रतिष्ठे वाइंद्राग्नी प्रतिष्ठित्या एवाथ यत्सन्नयन्नमावास्यायामिंद्रं यजते तज्योतिर्वअभिमास्या
नस्तत्र चंद्रो हन्यतेऽथ यदसन्नयत्पुरोडाशावंतरेणोपांश्वाज्यस्य यजत्यजामितायाअथय
सन्नयत्सांनाय्यस्यांतरेणोपांश्वाज्यस्य यजतितस्योक्तं ब्राह्मणमिति॥ मानवे च ध्रौवस्याद्योपां
शुयाजमग्नीषोमीयं पौर्णमास्यां वैन्द्रवममावास्यायामिति अतोमावास्यायामप्युपांशुयाजो भवति
या॥ वदुविरुत्तरार्धात्स्विष्टकृतः॥ यावद्विरितियावंति हवींषि भवंति॥ तेषां सर्वेषामुत्तरार्धादुत्त
रस्मात्सदेशात्स्विष्टकृतः स्विष्टकृद्यागार्थमवद्यति॥ तस्माद्यस्यैकस्यै च देवतायै हविर्गृह्यते स
र्वैव स्विष्टकृद्देवताभक्ता इति श्रुतेः॥ सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यतीति विज्ञानाव
गुवाद्यान्न॥ तत्र जमदग्नीनां द्वे अवदाने॥ इतरेषांत्वेकमिति॥ एकमसवायत्स्विष्टकृतइ
तिपरिभाषितत्वात्॥ स्विष्टकृतोवदानमेकमसवायं प्रधानयागावदानं संख्यातएकेनभूयं
नंभ॥ वति॥ तेनयस्य प्रधानयागे त्रीण्यवदानानि तस्य स्विष्टकृति द्वे अन्यस्य प्रधानयागे
द्वे अवदाने तस्यात्वेकमिति अभिघारणं चोपरिष्टाद्द्विर्भवति॥ द्विश्चाभिघारणमिसक्तत्वात्
अत्र सर्वेषां हविषामुत्तरार्धादवदाय सहैवैकं प्रदानं कर्तव्यं॥ नद्व्यभेदे गुणयोगादिति वा स्व
इतिसूत्रात्॥ द्रव्यस्य पुरोडाशत्वान्नाप्यादेर्भेदेपि देवतायां समानायामवदानं प्रदानां तं भवति किं
तु सर्वेषां सहैवैकत्रावदाय सकृद्देवयागोनुष्ठेय इत्यर्थः॥ प्रतिपसर्थकर्मन्चैतनतत॥ हविषाद्

श्री
९६
16

तराद्धात्प्रतिपाद्यते॥ यागश्चक्रियतइति॥ अतएव यावदुक्तेपि स्विष्टकृद्भागो भवति॥ ततएव होमः॥
ततइग्नेरुत्तरार्द्धएव स्विष्टकृद्वदानानां होमेभवति॥ सवाउत्तरार्द्धादवद्यस्ततउत्तरार्द्धे जुहोतीतिश्रुतेः॥
शेषात्स्विष्टकृतेसमवद्यतीत्युक्तत्वात्सर्वावद्धविरित्युक्तत्वाच्चोपांशुयाजशेषाद्ध्रौवाद्यपि स्वि
ष्टकृद्ववदानेप्राप्तेआह॥ नाज्याच्छेषात्॥ आज्यात्ध्रौवादाज्या स्विष्टकृतेनावद्यति॥ कुतः॥
अशेषात्॥ नह्येतदुपांशुयाजस्यशेषः सर्वार्थत्वात्॥ तथाहि॥ उपस्तरणमभिघारयन्नाज्यस्यय
जनध्रुवायां गृह्णातीति॥ अपराव्याख्या॥ आज्यात्स्विष्टकृतोनावद्येयं॥ कुतः॥ अशेषात्॥ नह्या
ज्यंशेषरूपमस्ति॥ शेषस्यहिकृतार्थस्यप्रतिपत्तेक्षैस्यस्छिन्नस्यप्रतिपत्त्यर्थानिशेषकार्याणि॥
नचाज्यमेवंविधमस्ति॥ नह्युपांशुयाजार्थंपूर्वंपृथक्प्रकल्पितमस्तियस्यशेषोभवति॥ अतः
साधारणादेवध्रौवात्क्वचनेनोपांशुयाजार्थंगृहीतत्तोयंतावदध्रुवायामुपांशुयाजार्थंगृहीतेवसि
ष्टमाज्यं॥ नसर्वस्वाङ्गाव्यूपस्तरणाभिघारणाद्युपयोगीसकृत्तार्थंनप्रतिपत्त्यर्थसर्वंनित्यचनेननिः
शेषेनसमियजुहूयतइतिनततः शेषकार्यं॥ यत्तुजुह्वांचतुर्गृहीतंतन्निःशेषकृतमितिशेषाभा
वादेव—तत्संबंधिकार्यस्याभावः॥ असंसृष्टाभ्यामाहुतिभिः॥ स्विष्टकृदाहुतिंजुहुयादितिशेषः स्वि
ष्टकृदाहुतिभिरराज्यभागप्रधानाहुतिभिः सहासंसृष्टामसंसृष्टांजुहुयात्॥ सवाअभ्यर्द्धइवेत
राभ्यआहुतिभ्योजुहोतीतिश्रुतेः॥ अभ्यर्द्धः पृथगसंसृष्टइत्यर्थः॥ अथाहापस्तंबः॥ जुह्वामुपस्ती राम
र्यसर्वेषांहविषामुत्तरार्द्धात्सकृत्स्विष्टकृतेवद्यतिद्विपंचावत्तिनोदैवतस्विष्टकृतेउत्तरार्द्धाकरणिका ९६
नामुत्तरंज्यायोद्विरभिघार्यनहविः प्रत्यभिघारयत्यग्नये स्विष्टकृतेनुब्रूह्यग्निः स्विष्टकृतंयजे

त्तिसंप्रैषादुत्तरार्द्धं पूर्वार्द्धे जुहोति॥असंसक्ताभिस्तराभिराङ्गुलिभिरिति॥एवमेवमानवेपि॥२॥
निधाय संचरामभ्यक्षस्य प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा स्विष्टकृद्धोमानंतरमपउपस्त
रणस्रुचौ निधाय स्वास्थाने सादयित्वाऽनंतरं संचरं होमार्थगमनागमनमार्गमञ्जिरभ्यक्षस्य प्राशि
त्रहरणे प्राशित्रमध्वर्युर्द्विरवद्यति॥तच्च पुरोडाशस्य मध्याद्यवमात्रं यवप्रमाणं पिप्पलमात्रं
वा॥पिप्पलप्रमाणं वावद्यति॥परिधीन परेण संचरो होत्र्यनंतर स्वयं संचरः॥तस्याभ्यक्षणम
नुयाजार्थं॥यतः स्विष्टकृतः परममनेन संचरणमनुयाजार्थमेव॥अतः करिष्यमाणप्रयोजन
त्वादनुयाजार्थं नैव युक्ता॥अतोनुयाजाभावे आतिथ्योपसत्सवस्य गृहमेधीयाद्येषु संचराभ्य
क्षणं न भवति पशोश्चान्यं गस्विष्टकृद्यागानंतरं संचराभ्यक्षणं स्कन्नायां च तृतीयसवनसंबं
धिसवनीयपुरोडाशा स्विष्टकृदनंतरं संचराभ्यक्षणं॥प्राशित्रं ब्रह्मणो भागः॥तद्द्विरवद्यति॥
स आज्यस्योपस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयतीति श्रुतेः॥अन्यतरस्आ
ज्यं॥न स पूर्वोक्तस्य प्राशित्रस्यान्यतरस्आज्यं भवति॥उपस्तरणाति वाभिघारयति वेति स
यस्याशित्रमवद्यतीति प्राशित्रं प्रकृत्यान्यतरस्आज्यं कुर्यादधस्तादुपरिष्टाद्वेति श्रुतेः॥उभयतो
वा॥अथवा प्राशित्रावदाने उभयत आज्यमवद्यति॥उभयतस्त्वपस्तारे भिघारे च॥एवम
पि श्रुततात स आज्यस्योपस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयतीति॥आ
ग्नेयात॥आग्नेयात्पुरोडाशात्प्राशित्रमवद्यति॥आग्नेयान्मस्तकं निरूप्यदेशकलेऽवद्यति
यवमात्रे पिप्पलमात्रे वेति श्रुततात्तामागांश्च षडवत्त ब्रह्मभागयजमानभागानाग्नेयादेवा

श्री वद्येत्॥न्यायएवायं॥अविशेषेणप्राशित्रभागानामवदानश्रवणान्मुख्यत्वादाग्नेयाद्भागांश्चे
१७ ष्टकृत्॥प्राशित्रेणसमानपूर्वपक्षत्वाद्भागानामत्रकीर्तनमात्रं॥भागानामवदानक्रममुपरिष्टा
17 द्वक्ष्यति॥अयंचपूर्वपक्षः प्राशित्रभागानांयदाग्नेयादवदानविधानं॥सिद्धांतअग्नेर्नवि
ष्यतिक्रमोवाविशेषादिति॥स्थितन्यवदसमासमेवाधिकरणं॥अंतराअन्यत्कर्मोच्यते॥
न्तकुतः॥एतत्पूर्वपक्षस्यचतुर्द्धाकरणसिद्धांतस्यचसमानन्यायत्वादिति॥अध्वर्युसं
चरेणप्रदायपूर्वेणैकेपउपस्तरणेइडांपंचावत्तांदक्षिणतोमध्याद्यावद्धविःस्विष्टकृद्
दाज्यं॥यस्मात्शित्रंपूर्वमवत्तंतदध्वर्युसंचरेणपरिचीनपरेणब्रह्मणेप्रदायसमर्थएके
शाखिनःआहवनीयंपूर्वेणापिप्राशित्रब्रह्मणेसमर्पयंति॥ततःप्राशित्रसमर्प्पणानानं
तरंमध्वर्युउपस्तरणपंचावत्तांसिडामवद्यति॥कथं॥यावद्धविर्दक्षिणतोमध्याच्च॥या
वंतिहवींषिभवंतितेषांसर्वेषांप्रथमंदक्षिणतोदक्षिणस्मात्प्रदेशात्॥मध्याच्चसर्वहवि
षांमध्यप्रदेशाद्येडामवद्यति॥तत्राज्यंस्विष्टकृद्भवति॥सकृदुपस्तृणातिद्विरभिघारय
तीति॥उक्तंहिस्विष्टकृति॥द्विश्चाभिघारणमिति॥इडावदानसहविःशेषप्रतिपत्तित्वा
द्यावद्धविरित्युक्तं॥मानवे॥तिष्ठथेडापात्रीतस्यामुपस्तीर्यद्विर्द्विरवद्यतिस्विष्टकृद्वीयादैवते
भ्योदक्षिणस्यभक्षानवद्यतिदक्षिणसदक्षिणार्द्धादवदायपूर्वार्द्धाद्यजमानभागमिति॥ राम
दक्षिणतोमध्याद्यावद्यतिस्विष्टकृद्वदाज्यमिसेतावतैवपंचावत्तत्वसिद्धेःयसंचावत्तग्र १७
हणं॥तस्लीसंयाजेइडापामपिपंचावत्ततायथास्यादित्येवमर्थं॥अन्यथातत्राज्यस्य

पुरोडाशस्थानीयत्वेन तस्याज्यस्य द्विरवदानमेव प्राप्नोति॥ अपउपस्तस्येति प्राशित्रस्य रूढि
यथा खादुक्तं यदेवात्राविद्धं यज्ञस्य यद्रुद्रियं तद्देवैतन्निर्मिमीते तथा उपस्तस्मतीति श्रुतेः॥
आविद्धं शल्यं इडेति च संज्ञा इडामादधातीसादेस व्यवहारार्था॥ यजमानभागं पूर्वार्द्धा
दीर्घं प्रश्नीर्य पुरस्ताद्ध्रुवायाः करोति इडावदानानंतरं भागावदानावसरः॥ ततश्च पूर्वमग्नीध
षडवत्तमवद्यंति॥ तत्र एकस्मिन्वारणे पात्रे उभयत्र खानवनितउभयत्रोपस्तीर्यैकैकमवदानमव
दायोपरिष्टादभिघार्य षडवत्तं संपादनीयं॥ ततः पुरोडाशस्यानियतप्रदेशाद्ब्रह्मभागमवद्यति॥
ततः पुरोडाशस्य पूर्वार्द्धात्सूक्ष्मात्प्रदेशादणुं दीर्घं च यजमानभागं प्रश्नीर्य पुरोडाशस्य रूस
ध्रुवायाः पुरस्ताद्वर्हिषि करोति निदधाति॥ स समवदायेडां पूर्वार्द्धे पुरोडाशस्य प्रश्नीर्य पुरस्ताद्ध्रु
वायै निदधातीति श्रुतेः॥ अत्रापस्तंबः॥ अग्नीधे षडवत्तं संपादयति सकृदुपस्तीर्य द्विरादधा
तिउपस्तीर्य द्विरभिधारयसपि वारुपस्तृणाति द्विरादधाति द्विरभिधारयतीति॥ मानवे च॥ ए
षयस्याण्योराग्नीध्राघावतीति पाण्योरेवावदानमुक्तं॥ काठके च॥ अग्नीधः पाण्यो रुपस्तीर्य रुद्ध
ले आधायेति॥ आपस्तंबः॥ पूर्वार्द्धाच्च यजमानभागमणुमिव दीर्घं तमाज्येन संतप्य ध्रुवायाउ
पोहतीति॥ नैत्तिरिसूत्रे॥ अथ दक्षिणास्येव पुरोडाशस्य पूर्वार्द्धा[illegible]अंगुलावान्चतुरंगुलं वाज्येन सुसं
तसंसंतप्याग्निणध्रुवां यजभागं निदधातीति॥ इडां होत्रे प्रदायाविसर्जं दक्षिणातिक्रामति य
जमानभागस्य ध्रुवायाः पुरस्तान्निधानानंतरं तामवत्तामिडां होत्रे प्रदाय समर्थ्याध्वर्युरविसर्जन्
तामिडां हस्तेनाविमुंचन् दक्षिणातिक्रामति होतारं दक्षिणेनातिक्रम्य प्रदक्षिणं मुक्तोत्तरपार्श्वे

श्री ४८

19

न होतुः पुरस्तात्प्रागग्रसोपविशन्तीति ॥ प्रत्यङ्मुखः ॥ आपस्तंबः ॥ अभिधार्येडां होत्रे प्रदाय दक्षिणेन हो
तारमतिक्रम सव्यस्य जन्होतेडयाध्वर्युं परिगृह्णाति अपि वा प्राचीमिडामध्वर्युर्दक्षिणत आसीनः स्रु
वेण होतुरंगुलीपर्वणी अनक्तीति ॥ मानवे ॥ इडामभिधार्य प्रत्यङासीनो होत्रे प्रयच्छ सन्तरेण
होतामिडां चाध्वर्युर्दक्षिणातिक्रामति परिगृह्णाति होतानन्वृज्जन् होतुरंगुली पर्वणी अन
क्त्यंतरमग्नेय चाग्निमिति ॥ इडां प्रतिगृह्य होतुरंगुलिपर्वणी अनक्ति ॥ ततोऽध्वर्युर्होतुः पुरस्ता
त्प्रत्यङ्मुख उपविश्य होत्रा समर्पितामिडां प्रतिगृह्य दायेडारूपेनैवाज्येन होतुरंगुलिपर्वणी अ
अनक्ति उत्तमं मध्यमं च ॥ पर्वशब्दः संधिवाची ॥ कांडवाची वा ॥ तैत्तिरीये ॥ अथ कंसं चमसं वे
डोपहवनं याचति तमं तवेदिति धाय तस्मिन्नुपस्तीर्य दक्षिणस्य पुरोडाशस्य दक्षिणार्धात्संरुभ्या
वद्यतीति शांखायनः ॥ अथ यस्मादेव स्मामिडायाः स्रुवेणानक्ति उत्तमे च पर्वणी मध्यमे
ति ॥ प्रकृतामेवेडायां सूत्रे इडां प्रतिगृह्णीतेति पुनरिडाग्रहणं इडाया एवसकारात्सर्वाञ्जनं य
थास्यादित्येवमर्थं ॥ नत्त्वतः ॥ श्रुतौ तमारब्धानात्सहोतुः रिह निलिंपामेइ इति प्रेहत्सएतद्ध
वै मनुरिसस्यां तेएतद्दैवेनां प्रापयते यदाषष्ट्योर्निलिंपत इति ॥ अवान्तरेडामादधाति
पूर्ववत् ॥ ततो होतुः पौर्णपूर्ववदवान्तरेडामादधाति अवघ्राति तां चेडायामेव ॥ कुतः ॥ अ
थ होतुः पाणौ समवघ्राति समवं नामेव सतीन देनां प्रत्यक्षहोन्तरिक्षयतीति श्रुतत्वात् ॥
पूर्ववदिति पंचावत्तां ॥ पुरोडाशावदानादेव पंचावत्तता ॥ नत्वाज्यं संसृष्टरूपत्वाद्विवेकेन
महीतुंन्त्राक्यत इति कर्कः ॥ अथाहापस्तंबः ॥ उपस्पष्टोदकामपुरस्तात्प्रत्यङासीन इडाया

तां २

होतुर्हस्तेवांतरेडामवस्यध्वर्युः प्रथममवदानमादधाति तस्यं होतोत्तरं मेतद्वा विपरीतं
लेपादुस्तरणाभिधारणे भवतोद्विरभिधारयेसंचावत्तिनउपहूयमानामन्वारभेतेअध्व
र्युश्चयजमानश्चेति॥ तत्तिरीय॥ चतुरवांतरेडामवद्यस्रुपस्तरणाभिघारणादसभिधा
रयतीति॥ काठकेच॥ द्विर्द्विरिडामवदायद्विर्द्विरभिधार्यहोतुः स्रुवेणांगुलिपर्वणी अनक्ति पूर्व
मग्नेयथापरं तस्य पाणाविडालोपाद्विरुपस्तीर्य तेन प्रकृतमन्यस्तस्रूदवदायद्विरभिः घार्य हो
त्रेइडामादधात्युपहूतामिडामन्वारभेते तिलेपादुपस्तीर्यलेपादभिघारयतीति मानवे॥
इडां च॥ होतुः पाणाववांतरेडावदानानंतरं इडां च होतुर्हस्तेआदधाति॥ अर्पयति॥ सर्वे
न्वारभंते॥ उपहूयमानामिडां इडाराद्धवा च्यं पुरोडाशादिद्रव्यं पयसा आमवत्तं तत्॥ सर्वेऋ
त्विग्यजमानाअन्वारभंते॥ आपस्तंबादिसूत्रेषु इडायाएवान्वारंभस्य दर्शना दिडाया
एवान्वारंभः॥ तस्याएवप्रकृतत्वादिति॥ इडोपहूतसकृच्यमाने आग्नेयं बर्हिर्दं करोति ब्र
ध्नपिन्वस्वायुर्मेत्वपश्रू मे धुक्ष्व धुक्षप्रजां मे धुक्ष्व ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व विशो मे धुक्ष्व
योस्मान्द्वेष्टि यंचवयंद्विष्मस्तस्य प्रजयापशुभिराप्यायस्वेति तं चतुर्द्धा कृत्वा॥ तमाग्नेयं पुरो
डाशं चैवं कृत्वा बर्हिर्दं तु र्द्धा कृत्वा ब्रध्नपिन्वस्वेतिमंत्रेण बर्हिषदं करोति चतुर्द्धा कृतं सं
तं मंत्रां ते बर्हिषि प्रक्षिपतीत्यर्थः॥ अथ यत्र प्रतिपद्यते तत्र चतुर्द्धा पुरोडाशं करोति
तदत्र पितृणां भाजनेन च तस्रो वा अवांतरदिशो वांतरदिशो वै पितरस्तस्माच्चतुर्द्धा पु
रोडाशं कृत्वा बर्हिषदं करोतीति श्रुतेः॥ बर्हिषि सीदतीति बर्हिषत्॥ यथा बर्हिषद्भव

धुक्ष्व प्रजां मे धुक्ष्व

श्री तीतितथाकरोतिबर्हिषिसादयतीसर्थः॥नदर्शपूर्णमासयोःपितॄणांभाजनेनहेतुना
१९ क्रियतइतिदोषः॥पितॄणांसंविभागार्थंइत्यर्थः॥किंतर्सितन्भ्यायतोनेत्याह॥किंतर्हित्वतुः
संख्यासामान्याद्बुद्धिःसंबंधाख्याना भक्तिमात्रमेतत्॥नह्यह्नचतस्रोवाइतिअवांतरदिशो
वैपितरइतितासुहिपितृयज्ञेतेभ्योदीयते॥अतोत्रापिचतुर्द्धाकृतस्यचत्वारोभागाअवां
तरदिक्षुबर्हिषिनिधीयंते॥इतिगम्यते॥आग्नेयंचतुर्द्धाकरोतीतिशाखांतरेश्रवणादा
ग्नेयस्यैवचतुर्द्धाकरणं॥नाग्नीषोमीयस्य॥बर्हिषदंतिग्मआदिशति॥तांश्चतुरःपु
रोडाशखंडान्बर्हिष्यवस्थितान्नेवयजमानकृतिग्भ्यआदिशति॥इदंब्रह्मणइदंहोतु
रिदमध्वर्योरिदमग्नीधइत्येवमृत्विक्संबंधेनोधारयतीसर्थः॥एतच्चाग्नेयकोणस्यदा
रभ्यप्रदक्षिणं॥कुतः॥अथोअपिसमीचएवपरिलिखेदंतत्वेवोत्तमंपरिलिखेद्यएषपूर्व
योरुत्तरोभवतीस्फ्यपरिवेषवांतरदिक्षेचवर्तमानेषुप्रदक्षिणपरिलेखपक्षेस्यक्रमस्यद
र्शनात्॥उत्तरपूर्वेलंसमितिसूत्राच्च॥अत्राहापस्तंबः॥आग्नेयंपुरोडाशंचतुर्द्धाकृत्वा
बर्हिषदंकरोतिबर्हिषदंवाकृत्वाचतुर्द्धाकरोतितंयजमानोभ्यादिशतीदंब्रह्मणइदंहो
तुरिदमध्वर्योरिदमग्नीधइति॥सत्तुषुत्यादेशाभांभावाच्चतुर्द्धाकरणाभावइतिकर्कः॥
अथप्राशित्रंभागांश्चाग्नेयादवद्यतीसेवंपूर्वपक्षेस्थितादुत्तरमुच्यते॥उभौवाविशेषात्॥ राम
वाशब्दःपूर्वपक्षनिरासार्थः॥उभावपिपुरोडाशौप्राशित्रावदानेनभागावदानेनचप्रति १९
पाद्यौ॥कुतः॥अविशेषात्॥अविशेषेणहविर्मात्रात्प्राशित्रंभागांश्चश्रूयंतेयतः॥तथा

हि॥ स यत्प्राशित्रमवद्यतीति प्राशित्रं प्रकृतस्य आज्यस्योपस्तीर्य द्विर्हविषोऽवदायेति हविर्मा
त्रात्प्राशित्रावदानमुक्तं॥ अतः पुरोडाशादपयस्यासान्नाय्यादेर्हविर्मात्रादवद्येयं॥ न तु प्राशि
त्रेऽत्र विशेषः॥ आग्नेयान्मस्तकं विरुज्येति॥ नैवं॥ प्रदेशाविधिपरत्वाद्वाक्यस्य॥ मस्तकं
विरुज्येति॥ तेनाग्नेयग्रहणमत्रोपलक्षणार्थं॥ भागानामपि पूर्वार्द्धं पुरोडाशस्य प्रशीर्य
सेवं पुरोडाशमात्रसंयोगः॥ अतः षडवत्तत्वं सभागयजमानभागा अपि द्वयोः पुरोडाश
योर्ग्राह्याः॥ परत्वयं विशेषः॥ पुरोडाशसंयोगाद्भागाः सान्नाय्यस्य न भवंति॥ चतुर्द्धाकर
णमपि पि सान्नाय्यस्य न भवति॥ तच्चतुर्द्धा पुरोडाशं कृत्वेति तस्यापि पुरोडाशसंयोगात्॥ अ
तएव सिद्धं॥ प्राशित्रं हविर्मात्रात्॥ भागाश्च पुरोडाशमात्रात्॥ चतुर्द्धाकरणमाग्नेयस्यैवेति॥
विकृतिष्वपि आग्नेयविकारस्यैव सकृद्देवत्यस्य चतुर्द्धाकरणं नानेकदेवत्यस्य॥ भागास्तु सा
न्नाय्यव्यतिरिक्तास्सर्वहविषां भवंति॥ प्राशित्रं हविर्मात्रादिति॥ हरिस्वामिनामप्ययमेवा
भिप्रायो यदैकैकदेवत्यानामपि चतुर्द्धाकरणव्यतिरिक्ताः सर्वे भागा भवंतीति यतो गृहमेधी
यायामनेकदेवत्यायां गृहमेधिचरौ अथेडामेवावद्यति न प्राशित्रमिति सूत्रे एवं व्याख्यातवंतः॥
इडामवद्यतीत्ययमनुवादः अप्रासंगिकत्वाद्भितस्याः॥ न प्राशित्रमिति तु प्रासप्रतिषेधः॥
ततश्च त्वंसभागाद्येयमतिषिद्धत्वादिडावदवद्येयादिति॥ आग्नेयादेव भागा इति समानेते
तिरिस्तत्वेचास्ति॥ तानि च सूत्राणि प्राग्दर्शितानि अनेकयजमानकेप्येक एव यजमानभा
गो भवति॥ न प्रतियजमानं भिन्नः॥ हविषः प्रधानत्वात्॥ न मेव विभज्य सर्वे भक्षयंति॥

श्री २० अत्रपितरइतियजमानोयजति॥अग्निमसूत्रेविसृज्येतिविसर्गस्यवक्ष्यमाणत्वात्तस्यना
त्वारंभपूर्वकत्वारंभस्यचयाजमानत्वाच्चतुर्द्धाकृतंपुरोडाशमालभ्ययजमानोत्रपितरो
मादयध्वमितिसमुंमंत्रंसंहितास्वरेणजपति॥पित्र्यत्वान्मंत्रस्यप्राचीनावीतंकृत्वा॥विसृज्या
मीमदंतेति॥ततोविसृज्यचतुर्द्धाकृतंपुरोडाशंविसृज्यमुक्त्वाप्राचीनावीसेवामीमदंतद
समुंमंत्रंस्वरेणजपति॥अत्रामीमदंतपितरइतिकासायनवचनादनयोःपित्र्यत्वं॥तेनान
योरुच्चारणानंतरंसव्यंकृत्वापामुपस्पर्शनंकार्यं॥पित्र्यमालानंवालभ्योपस्पर्शः॥रौद्र
षदनिपरिभाषायामुक्तत्वात्॥एकैकमाहरति॥एकैकंभागंभागिनेआहृत्यसमर्पयती
सर्थः॥इदंब्रह्मणे॥इदंहोत्रे॥इदमध्वर्यवे॥इदमग्नीधे॥इत्येवं॥एतच्चसमर्पणंभक्षणा
र्थं॥नपरिक्रयार्थं॥पक्वान्नोपहारस्यभक्षणार्थत्वप्रसिद्धेः॥प्रतिपत्तिश्चैषा॥साच्चपक्वस
भक्षणोनैवलोकतःप्राप्ता॥तत्रकर्तृविशेषमात्रापेक्षायांब्रह्मादयोनियम्यंते॥सोपिनिय
मोदृष्टार्थः॥भक्षणादिकरिष्यमाणकर्मणिसामर्थ्यंभवतीतिभक्षणार्थंता॥द्यावापृथिव्यो
रुपह्वानेग्नीधेषडवत्तं॥होत्राउपहूतेद्यावापृथिवीइत्येवंद्यावापृथिव्योरुपह्वानेक्रियमा
णेचयजमानोग्नीषेधषडवत्तमाहरति॥ददातीत्यर्थः॥अन्वयत्राहोपहूतेद्यावापृथिवी
इतितदग्नीधआदधातीतिश्रुतेः॥आप्पूर्वेदधातिरन्यत्रस्थापनेप्रयुक्तः॥अत्रतर्पणेइ राम २०
ष्टव्यः॥नचैषषडवभागः॥किंतर्ह्यन्यएवायमग्नीध्रभागः॥प्राशित्रंचेडाचयथाग्नीधआद
धातीतीडानेदेनव्यपदेशात्॥एतेनैवब्रह्मभागयजमानभागयोरपीडातोभेदःसिद्धः॥य

तोनयोरपिइडानोभेदेनव्यपदेशोस्ति॥प्राशित्रंचेडा चयस्यान्नीधआदधातीत्ब्रह्मभागोय
जमानभागोन्वाहार्यइतिअग्निमीधेदीपयतिसंमार्गेणसम्नीत॥षडवत्तंतत्राद्यार्थेपूर्वमुक्तः॥
प्राश्नासुपहूताप्टथिवीति॥नसडवत्तमग्नीत्प्राश्नातिउपहूताप्टथिवीसनेनमंत्रेण॥अयद्वि
तीयमुपहूतोयोरिसेवन्नात्वांनरेभ्युनमपिसूत्रकृतानोपनिबद्धं॥तत्कुतः॥वाक्यभेदादेव
स्यार्थस्यसिद्धत्वात्॥तेनैवानुष्ठेयं॥आसासानेभयीदमितियजमानोयजेति॥भूपसिहविः॥
करणाउपहूतइसेवमाधात्री:प्रार्थनमात्रासनं॥एषावाआत्रीरिस्कृत्वात्॥आत्रासाने
होतरियजमानोमयी॥इमिंइस्समुंमंत्रंस्वरेणजपति॥नत्रुपुरुषयोगिमंत्रसंस्कारयोरिस्
नेनयजमानस्यात्रसिद्धत्वात्किमर्थंयजमानग्रहणमितिचेत्॥नपत्नीसंयाजेडायामपिय
जमानस्यैवजपस्त्रास्यर्थं॥तत्रहिशाखायनेनउपहूतेयंयजमानीतिवाविकारइतिपत्नीप
हवोविहितोस्ति॥तदाआशीर्वचनेनेकवाक्यत्वासल्पाएवजपोमाभूदितियजमानइत्युक्तं॥
अनेकयजमानकेसर्वेषांजपः॥आशीःप्रार्थनार्थत्वात्॥नचोहःप्रसेकंजपोमयीसेकव
चनस्याविरुद्धत्वात्॥उपहूतांप्राश्नंतियुक्ताः॥उपहूतांमिंद्रांयुक्ताइतिसर्वेऋत्विजःप्रा
श्नंतीसर्थः॥तावेप्राश्नंसेवनाग्नोजुहतीतिश्रुतेः॥यजमानश्च॥यजमानोपिचकारा
दिडांप्राश्नाति॥एतस्मादिडाभागाश्च्यावदुक्तेनापठित्वेनभवंतिद्रव्यसंस्कारत्वात्॥प
वित्रयोमार्जयंतेपरेणवेदिंसुमित्रियानइति॥वेदिमपरेणोपविष्टाःस्वमिमानआमेकं
षधयःसंत्विसेतावतामंत्रेणपवित्रयोरवस्थितािभिरद्भिर्मार्जयंते॥प्रस्तूरप्रत्नौन्वालंकार

श्री
२१
योः॥आसानं रोधयंती सर्पः॥अथ पवित्रयोर्मार्जयंते इति श्रुतेः॥उक्तौ सूत्रे न पवि
योरिति सप्तमी निर्देशो दाधारभूते पवित्रे॥तत्राधेयता आप इति गम्यते शुंभमाना आ
प इति मंत्रलिंगात्॥अथ यस पवित्रवति मार्जयंते शांतिवं भेषजमाप इति शाखांतरा
त्वा॥अपरे त्वेवमाहुः॥पवित्रयोरिति विभक्तिव्यत्ययः तृतीयार्थे सप्तमी सपरे पवि
त्राभ्यां मार्जयंत इत्यर्थः॥कुत एतत्॥पवित्रपूतास्तनवामहा इति वाक्यशेषात्॥प
वित्राभ्यां पूताः पवित्रपूता इति कर्काचार्यैर्हरिस्वामिभिश्चैवं व्याख्यानमस्ति॥अत्र
संहितैव मंत्र एव मंत्रः वाक्यस्य परिसमाप्तत्वात्॥यजमानस्य प्राणापानोपानमि
ति प्रस्तरे तत् करोति॥यजमानस्येत्यनेन मंत्रेण मार्जनानंतरं ते पवित्रे प्रस्तरे करोति
याभ्यां मार्जनं कृतं॥अथ ते पवित्रे प्रस्तरेपिसृजतीति श्रुतेः॥अपिसृजति संसृजती
ति समस्य मार्जनविधानेन प्रत्याख्यापवित्रस्य प्रस्तरे करणं प्राप्नोति तन्न सुहासार्थंतेइति
पुनरुक्तं॥अन्यथा पवित्रयोः प्रस्तृतत्वाद्वान्यमेव स्यात॥यजमानयोः प्राणापाना
विति द्वियजमानके ऊहः॥यजमानानां प्राणापानाविति बहुयजमानक इति॥तूष्णीं वा॥
अथवा तूष्णीं मंत्रवर्जमेव पवित्रयोः प्रस्तरे करणं॥अत्र वा ब्रह्मा प्राश्नाति॥अथवा ब्रह्मा
अत्रास्मिन्काले वा प्राशित्रं प्राश्नाति॥भागमस्मै परिहरति॥अस्मै ब्रह्मणे अध्वर्युर्ब्रह्म राम
भागं परिहरति॥अथास्मै ब्रह्मभागं पर्याहरंतीति श्रवणात्॥परिहरणं चाहवनीयं पू २१
र्वेण प्रदक्षिणं नयनं परिशब्दप्रयोगात्॥अयं चतुर्द्धाकरणभागव्यतिरिक्तः॥तेषां दान
ते

लाद्यायनेनसूत्रनात् आशिष्टं आहृतं ब्रह्मभागं प्राशित्रे निदध्याति

स्य पूर्वमेव विहितत्वात् एकैकमाहरतीति॥ अतोयं न यतिरिक्त एव॥ यजमानभागं वा प्रोषि
ते॥ अप्रोषिते तु तत्प्रवासे यजमानभागं च यजमानाय परिहरस ध्वर्युरिवात्तं च गार्हपत्य
मपरेण नीत्वा॥ अथवा यपरित्यागः॥ ब्रह्मा वाध्वर्युसमर्पितं भागं प्रतिगृह्य प्राशित्रे निदध्या
दिति मिश्रे संस्थितायां प्राश्नीयादिति॥ आश्वलायनसूत्रेपि॥ मार्जयित्वा स्मिन् ब्रह्म भागं
निदध्यात् सम्स्थाकुरेषु (?) यजमानभागमिति॥ अस्मिन्निति प्राशित्रे॥ अप्रोषिते तु इति प्र
हणा॥ प्रोषिते यजमानेन तद्भागो वेदिमध्य एव तावत् निष्ठति यावत्तु प्रस्तरहोमानंतरं हूय
ते॥ अन्वाहार्यमभिधार्योद्वास्यांतरा ब्रह्मयजमानौ हृत्वा वेद्यां निधायालभते प्रजाप
तेर्भागोस्यूर्जं मितीति॥ भागपरिहरणानंतरमध्वर्युरन्वाहार्यमभिधार्य स्थालीस्थेनाज्ये
नोपरि सिक्तोत्तरेणोद्वास्य दक्षिणाग्नेरुपरिष्टादुत्तार्य गार्हपत्यदक्षिणाग्न्योरंतरालेन
प्रत्याहृत्य (?) दक्षिणाग्नेर्दक्षिणेन ब्रह्मयजमानावंतरा हृत्वा ब्रह्मयजमानयोरंतरालेन
नीत्वा तत्रापि यजमानं दक्षिणेन ब्रह्माणमुत्तरेण पूर्वेणाहवनीयं प्रणीतोत्करावंतरेण
हृत्वा वेद्यां वेदिमध्ये निधायासादयः प्रजापतेर्भागोसीत्यनेन मंत्रेणालभते ध्वर्युः॥ अन्नवि
कृतोऊर्गसीत्यस्य स्थाने दक्षिणाद्रव्यवाचि पदप्रयोगः॥ तद्यथा आग्नेयेण प्रथमजो गो
रसीति दाक्षायणे च हिरण्यमसीति॥ बहुत्वपिद्वेषु द्वैकवद्भावेनैकवचनांत स्यैव
प्रयोगः कर्तव्यः॥ यथैकाहिक चातुर्मास्येषु प्रथमजगवधेन्वृषभोष्टारास्य मसीति॥
क्वचित् द्विगुसमासे कवद्भावेन तद्यथा तनूहविःषु॥ त्रिगवमसि षड्गवमसि द्वादशगव

श्री मसीतिवा॥ न्यूमसीनांदानपक्षेचपंचविंशतिगवमसिषड्विंशतिवमसीत्यादिज्ञेयं॥ सोवा
२२ मण्यांतुत्रयस्त्रिंशद्ववान्त्रिंशुवडवधेन्वसीतिप्रयोगः॥ अभिधारणंत्वन्वाहार्यस्यैव॥ अ
न्यामनुपयोगात्स्वादिमेघोदनोभिघार्यते॥ नन्वान्येषांस्वादिम्नाप्रयोजनं॥ अतस्तेषां
नाभिघारः॥ आरंभस्तुगवादेरपिभवतिनाभिघारः॥ गोत्वब्रह्मयजमानयोरंतराह
रणंनभवतिद्विरोधाद्दासस्तुप्रवर्तते॥ विरोधाभावादितिकर्कोपाध्यायाः॥ अत्राहाप
स्तंबः॥ दक्षिणाग्नावन्वाहार्यंमहांतमपरिमितमोदनंपचनिक्षीरेभवतीतिसेकेनम
भिघार्यानभिघार्यवोद्वास्यांतर्वेद्यासाद्यतेभ्योन्वाहार्यंददातित्र्यालणा अयंवन्दन
इतिप्रतिगृह्णीतेति॥ सादक्षिणायएषोन्वाहार्यउक्तः॥ सात्रदर्शपूर्णमासयोर्दक्षिणाज्ञे
या॥ दर्शपूर्णमासयोर्ह्येवैषादक्षिणपदन्वाहार्यइतितत्तोदेवाएतांदर्शपूर्णमासयोर्द
क्षिणामकल्पयन्यदन्वाहार्यमितिश्रुतेः॥ उदङुद्वासयति॥ दानानंतरमन्वाहार्यंवे
दिमध्यादुदगुदीच्यांदिश्युत्क्षासयतिबर्हिर्निष्क्रामयति॥ स्वावांतरान॥ हविश्च॥ हवि
परियदग्नीषोमीयसान्नाय्यादिकंशेषभूतं॥ चतुर्द्धाकरणंयस्यनभवतितच्छिष्टमित्यनी
मुदगुद्वासयति॥ वेदबर्हिःनिःकासयति॥ तथाचाहापस्तंबः॥ हविःशेषानुद्वास्या
पिसज्योल्मुकेइतिमानवेच॥ अपरेणस्रुक्रंउनुदंचमुद्वासयति॥ दोहोपात्रीचेति॥ ते राम
नित्यिपेपि॥ उद्वासयंसेतदुविरुच्छिष्टमिति॥ कात्यकेच॥ अन्वाहार्यमोदनंदक्षिणाग्नौश्र २२
तंमहांतमपरिमितमन्यतोभिघारितंवेघामभिपंत्रा॥ ऋत्विग्भ्योदक्षिणांदद्यात्सहविरुच्छि

ष्टमुद्वास्यानुयाजिकीं समिधमादायाहेति ॥ ॥ समस्योल्मुके समिमादायाह ब्रह्मन्प्रस्था
स्यामि समिधमाधायाग्निमग्नीन्संमृड्ढीति ॥ ततोऽध्वर्युरुल्मुके समस्याहवनीयमध्य एव
प्रतिप्रक्षिप्याहवनीयेन मिश्रयित्वा ततः प्राक्प्रतिशोषितां समिधमादाय ब्रह्मन्प्रस्थास्या
मीति ब्रह्माणं प्रत्याह ब्रवीति ॥ ततः समिधमाधायेत्यादिकमग्नीध्रं प्रत्याह ॥ अत एव प्रेष्य
भेदाद् ब्रह्मन्प्रस्थास्यामीत्यत्रावसानं ॥ ततः समिधमाधायेत्यादिकं ॥ एवं चैतौ द्वौ प्रैषौ ॥ तत्र
एकोऽनुयाजार्थः ॥ ततश्चानुयाजाभावे आतिथ्यापपस्यागृहमेधीयोपसद्दादौ न भवति ॥
अग्निसंमार्गस्त्वनुयाजाभावेप्यग्निसंस्कारत्वादातिथ्यादौ प्रवर्तत एव तदर्थश्च ये
प्रैषोपि गृहमेधीये तु न प्रवर्तते ॥ तानूनप्त्रीयात्तंत्रमध्यपातात्तत्समिद्दानमाधानार्थं ॥
न तु प्रैषार्थोपि उपपन्नः ॥ ततश्चानुयाजाभावे तस्या अभावादेवादानाभावः ॥ उल्मुकसमा
सश्चानुयाजार्थ आहवनीयसंस्कारः ॥ अतश्च समासविस्मरणेऽनुयाजसमास्यनंतरं
पुनरसमासः ॥ वरुणप्रघासेषु ब्रह्मन्प्रस्थास्यावः समिधायाग्नीन्संमृड्ढीति एवमूहः कार्यः ॥ भ्यो
एषा ते इति होतानुमंत्रयते ॥ होता एषा ते इत्यनेन मंत्रेण तां समिमनुमंत्रयते ॥ प्रैषश्रव
णानंतरं चाग्नीत्तां समिधमिध्मकाष्ठरूपामाहवनीयेऽभ्यादधाति तत्रस्थस्यानुमंत्रणं ॥ अ
भ्यसमिधमभ्यादध्यातीतिपठित्वा ताः होतानुमंत्रयत इति अभ्याधानानंतरं अनुमंत्रण
श्रुतेः ॥ अजानन्तियजमानः अनुमंत्रणं कर्तुमजानन्ति होता न त्वियजमान एषा ते इति समिधम
नुमंत्रयते ॥ ताः होतानुमंत्रयत एवा त इति सपदिमन्यते सत्कान होतावेदे सपिस्त्वयमेव

श्री यजमानोनुमंत्रयेतेतिश्रुतेः॥ वरुणप्रघासेषुच॥ एतेवामग्नीसमिधौताभ्यांवर्द्धयांवाच
२२ यापयथां॥ इत्यूहः॥ अनेकयजमानकेषुद्वत्वानीयाबहुत्वेप्रसक्त्यस्तास्ताम॥ समिध
23 आधायाग्नीनग्नीन्संमृष्टीतिनुप्रतिष्ठितेतिप्रसवः॥ समिधमनुमंत्रणे॥ एतावोअग्नयः
समिधस्ताभिवर्धध्वंचावर्ध्यापयध्वमित्यूहः॥ द्वितेनवरुणप्रघासवत्॥ संमार्ष्टिपूर्ववद्
परिक्रामं॰ सकृत्सकृत्सर्वाः॰ समिति॥ अग्नीवपूर्ववत्सर्वाः॰ समितिमंत्रेणसकृत्त
कृदग्निसंमार्ष्टि॥ संमार्जनेनविराजस्कमुज्वलंकरोति॥ कथं॥ अपरिक्रामं॥ परिक्रमणम
कृत्वाएकत्रोत्तरतः स्थितएव॥ दक्षिणपश्चिमोत्तरमध्येषुचतुर्ष्वपिअग्निप्रदेशेषुसंमा
र्ष्टि॥ पूर्ववदितीध्मसंनहनैरनुपरिध्यग्नेवाजजिदितिवेसेनावलम्यते॥ त्रिस्त्रिरितित
न्निरसर्थंसकृत्सकृदितिकृत्वं॥ परिक्रामममिसेतस्यनिरसर्थंमपरिक्राममिति॥ सर्वाः॰
समिसयंअग्नेवाजजिदिसस्मिन्मंत्रेविशेषः॥ संमार्गश्चाग्निसंस्कारः॥ तेनशानरुद्धित
स्थाप नामुपरिस्थिसपिभवति॥ ब्रह्मानुज्ञातोनुयाजैस्त्रिभिश्चरसोपभृतं॰ समानीय
ब्रह्मणार्कंप्रतिष्ठेसेवमनुज्ञातोध्वर्युरोपभृतमाज्यंशेषंजुह्वांसमानीयत्रि॥ भिरनुयाजै
श्चरति॥ ब्रह्मानुज्ञातइतिग्रहणं॥ सर्वप्रैषोत्तरकालमेतंनइत्यस्यावसरविधानार्थं॥
अन्यथाब्रह्मन्प्रस्थास्यामीसेतप्रैषसमनंतरमेवप्राप्नोतिनसर्वप्रैषानंतरंत्रिभिरिति राम
चानुयाजचित्तज्ञापनार्थमुक्तं॥ अथानुयाजान्यजतिसर्वेखलुबहिः प्रथमंयजति २२
अथनराशं॰ संहितीयंयजतिअथाग्निरुत्तमइतिचश्रुतत्वात्॥ अतिक्रम्याश्रव्या

हू देवान्यजेति॥ समानयनानंतरं जुहूमध्यक्षातिक्रम्य यजतिदेवांगत्वाम्नाय्य देवीन्यजे
सेवमाह॥ ब्रवीति॥ अतिक्रम्याम्नाय्येसनेनयजतित्वेन प्रासपुरोनुवाक्यानिरासः॥ त
कुतः॥ अथ यदपुरोनुवाक्यकाअनुयाज्या भवतीतिश्रुतेः॥ यजयजेस्त्वत्तरो॥ उत्तरो ह्याव
नुयाजोयजयजेसेवंमेष्यति॥ प्रथमे दएव देवान्यजेतिउत्तरयोस्तु यजयजेसेवाप्यतो
वरुणप्रघासेष्वेवमनुवादोहृत्स्यते देवान्यजेतियजयजेतीति॥ देवांदेवानितिवा सर्वत्र
नियमस्याद्भावात्॥ अथ वा देवान्यजदेवान्यजेसेवमेवसर्वत्र त्रिष्वप्यनुयाजेषु ब्रूयात्॥ कु
तः॥ नियमस्याद्भावात्॥ देवान्यजेसेवाध्वर्युराह देवं देवमिति सर्वेषु होतेति अत्र नियमप्र
तिपादकस्यैवकारस्य श्रवणात्॥ अतस्त्रिष्वपि देवान्यजेसेववक्तव्यं ननु ह्ययोरुत्तयो
र्यजयजेसेतावन्मात्रमिति॥ नेत्र॥ विकृतिदर्शनाच्च॥ विकृताउत्तरयोरप्यनुयाजयो
र्देवान्यजेसस्य प्रैषस्य दर्शनाच्च प्रकृतावपिसर्वेषु एवं प्रैषो भवतीत्यवसीयते॥ तथाम
हापितृयज्ञे प्रथमानुयाज्याभावेपिश्रूयते॥ देवान्यजेतिसोपबर्हिषोद्वाव[illegible]नुयाजौ
यजतीति॥ अतो नियमेन सर्वेष्वप्यनुयाजेषु देवान्यजेसेवप्रैषः यत्तु वरुणप्रघासेषु यजे
तिश्रवणं। तद्गुणविधानार्थमेकदेशानुवाद इतिपितृभूतिः॥ प्रकृतौ ह्याम्नातानराद्विक
ल्पः वरुणप्रघासेषुतु पुनर्यजेतिवचनं तस्यैव प्रयोगनियमार्थमितिकर्कः॥ प्रती
चो जुहोति॥ एतांस्त्रीननुयाजानध्वर्युः प्रतीचः प्रसक्तसंस्थाजुहोति॥ प्रसंचो नुया
जाइजितस्मात्तउपसद्रूपेणप्रसंचोहूयंतइतिश्रवणात्॥ अतएवत्रिलोमेनप्रसंगाद्दा

श्री
२४

ह॥ उपसत्कञ्च॥ ज्योतिष्टोमे उपसंस्थास्विष्टिषु चाग्निसोमविष्णुदेवतायागेषु प्र[illegible]तीचो
जुहोति प्रस्थसंस्थाहोमान्करोति॥ तस्मात् उपसद्रूपेण प्रसंचोद्रूपं तद् इति उपसद्धोमानां
प्रसक्तसंस्थत्वं सिद्धमेव दर्शयन्ति॥ यथा जवत्कर्तुरप्युपसरणे प्राप्ते सत्याह॥ ध्रुवः अ
नुयाजेष्वध्वर्युध्रुवः स्थिरो निश्चल एकत्र स्थित एवत्रीण्यप्यनुयाजान् प्रसक्तसंस्थां जुहो
ति न प्रति होमं प्रगपसरणं॥ चतुर्थश्च समानीयप्राञ्ची॥ तृतीयानुयाजहोमानंतर
मुपक्षिप्तोपभृतं सर्वं जुह्वां समानीय चतुर्थं होमं करोति॥ अथोत्तममनुयाजमिष्ट्वा
समानीय[illegible] जुहोतीति श्रुतेः॥ तत्र च प्राग्नीध्रात्संस्थामाहुतिं जुहोति नांस्थानं यतः॥
चतुर्थग्रहणमस्य होमस्यानुयाजांगत्वे प्रज्ञप्त्यर्थं॥ अन्यथा पूर्वाघारवदपूर्वोत्पादकं
स्वतंत्रं होमांतरं स्यात्॥ अंगत्वे तु तत्सनुयाजसज्ञावेभवति॥ अनुयाजाभावे च न भ
वतीति॥ अनुयाजांते स्वरुं जुहोतीति स्वरुहोमोपि सांगानुयाजोत्तरकालं भवति अथवा
देवानामेव वदेव तात यस्मिन्होमे यथा स्यादित्येवमर्थं चतुर्थग्रहणं॥ मंत्राभावेपि स्वाहा
कारेणाहोमः कर्तव्यः॥ पूर्णाहुतौ एवं सर्वत्रेति वक्ष्यमाणत्वात्॥ अत्राह मनुः॥ संमार्गवि
स्त्रंस्याभ्युक्ष्याग्नावभ्यस्येत्सौषभृतं जुह्वामानीयाप्रावृत्त्रीननुयाजान्यजति देवान्यजेति
प्रथमं यज यजेस्कत्तरौ समिधि प्रतीचः॥ पश्चाद्रुदितमनप्रांचावनुसंभिनेत्स क्ष्याक्रम्य राम्
यथास्थानं स्रुचौ सादयतीति॥ कात्यायने॥ उपभृतं जुह्वामासिच्यते नानुयाजान्यजति २४
देवान्यजेति प्रथमं यज यजेस्कत्तरौ विति॥ आपस्तंबः॥ इध्मसंनहनान्यद्भिः संस्पृ

यो भूतानामभिसर्गो प्रहरस्कंकरेवान्यस्यति॥ उपन्नतं जुह्वामानीय जुहूपभृतावादा
यदक्षिणासकृदतिक्रांतोग्नेणाघारसंभेदं प्रतीच्यस्थीन नुयाजान्यजसाम्नामांवमा
श्वावंप्रसाम्नावितेदेवान्यजेति प्रथमं संप्रेष्यति यज यजेति तरोपूर्वार्द्धे प्रथमं समि
धिजुहोति मध्ये द्वितीयं प्राचमुत्तमं संस्थापयन्नितरावनुसंभिद्य प्रसाक्रम्यायतनेग्नु
चौसादयिस्वेति॥ तैत्तिरीयपि॥ इध्मसंनहनान्यद्भिः संस्पर्श्याहवनीये नुप्रहरतियो
भूतानामभिसर्थ जुहूपभृतावादायासाक्रम्याश्राव्याह देवान्यजेति वषट्कृते जुहोतिय
जयजेति त्रीन्त्रतीवानुयाजान्यजति प्राचीनं तु संभिन्नसमोदङ्‌तिक्रम्यपथ्यायतन
नस्कू चौसादयति॥ अभिचरन्ननुयाजानुमंत्रणमत्रान्यमुंजहि द्वाद्धुं न्यमुंजहल्कूष्णू
मुंजहीति॥ अभिचरन्नध्वर्युरसान्यमुंजहीत्यादिभिस्त्रिभिर्मंत्रैः क्रमेणानुयाजाना
मनुमंत्रणं करोति॥ समप्रथममनुमंत्रयेतान्यमुंजहीति यद्विष्याक्षाद्दुन्यमुंकुष्यमु
ञहीति नृतीयमिति श्रुतेः॥ एतच्चानुमंत्रणमध्वर्युरेव करोति समाख्यानास्कनुषयो
गाभावाच्च॥ एवं प्रव्रस्के समं विभजेत्॥ विकृतौ वरुणप्रघासेषु पशौ चानुयाजप्रवृद्धावे
तानि त्रीण्यनुमंत्रणानि समं विभजेत॥ कुतः॥ समं स्यादश्रुतत्वादिति जैमिनिनोक्त
त्वात्तायद्यपि पुरुषार्थानामनुमंत्रणानां विकृतौ प्रवृत्तिर्नेष्यते तथाप्यनुयाजप्रवृत्तौ प्रव
त्तिरिष्टैवावान स्यसेन्चमसेप्रवर्समानेतदाश्रितब्रसवर्ववसंवदित्यभिप्रायः॥ सिद्धांतमा
ह॥ स्वस्थानासेनवोपापित्वात॥ वाराह्णः पूर्वपक्षनिरासे॥ स्वस्थानेयोसः स्वस्वस्थानासः॥

श्री तेन स्वस्थानां सेनागंतॄनामनुमंत्रणं कर्तव्यो कुतः॥ उपायित्वादागंतॄनां तस्य स्वस्थानां सस्य हि स्थाने
२५ नुपयंस्यागच्छंस्यागंतवः॥ अतस्तत्स्थानापन्नास्तद्धर्मं लभंत इति युक्तमेवोक्तं॥ प्रथमानुयाजबर्हिषो
नंतरं द्वितीयस्य नराशंसस्य स्थानं॥ तस्मिन्द्वितीयस्य स्थाने देवीर्द्वार इत्यादयः षडागंतवः पठिताः॥
25 ततः सप्तमो नराशंसः॥ ते तेषां नराशंसो द्वाः प्रभृतीनां सप्तानामंत्यः॥ अत एतेषां नराशंसा
नुमंत्रणेन क्राइंनीसनेनानुमंत्रणं द्वितीयस्थाने एकत्र सप्तानां होमश्च कार्यः॥ ततस्तृती
यस्य स्विष्टकृतः स्थाने देवो वनस्पतिर्देवं बर्हिरिति त्रिधा विकृतौ पठितौ देवो अग्निः स्विष्टकृदिति
प्राकृतो सः अतो वनस्पतिप्रभृतीनाम सो स्वस्थानां सः॥ अत एतेषां तृतीयस्यानुमंत्रणेनो
ऋषीसनेनानुमंत्रणं तृतीयस्थाने होमश्चेति सिद्धं॥ विकृतौ चानुयाजसंख्या प्राकृतानुयाजा
भ्यासेनैव पूरणीया॥ तस्या उत्पन्नशिष्टत्वेनोत्पत्तिशिष्टया त्रिसंख्यया सह विकल्पसमुच्चय
बाधानुपपत्तेः॥ अतोभ्यासेनैव पूरणीया॥ तस्माद्द्वितीयतृतीययोरभ्यासेन पूरणं युक्तं॥ न
द्युक्तं॥ अत्र सत्तोऽनुयाजसंख्या साभ्यासेनैव पूर्यते॥ दृष्टस्तेनानुयाजानामभ्यासो विकृतौ विति॥
तत्रां साभ्यासद्ध्येतत्सासाठेयदांतरा॥ तत्रित्वं तरपाठे तु नां सस्याभ्यासद्ध्यते॥ यतो वैकृ
तानां सप्तानां पठनादनंतरं मध्ये नराशंसः पठितः अतस्तस्य वैषां नराशंसधर्मसंबंधस्त
त्स्थानापन्नत्वात्॥ ततः परेषां तूत्तमस्येति॥ प्रयाजे॥ धृतु वैकृतमध्ये प्राकृतस्य पाठो नास्ति किं राम
चतुर्थानंतरं सर्वे वैकृताः पठिताः॥ ततो स्वाहाकाराः पंचमः पठितः तेन तत्रांस सैवाभ्या २५
सो युक्तः सर्वेषां तत्स्थानापन्नत्वादिति सर्वमनवद्यं॥ अत्रेयं कृता चिंता॥ अत्र मंत्रणं हि

पुरुषार्थत्वाद्द्वितीयो न प्राप्नोत्येव॥ तस्मात्कृतार्थत्वेन विकृतावनपेक्षितत्वात्॥ न च वानस्पत्यस्य चमस
न्यायः॥ तत्र हि वानस्पत्यस्य चमसः कृतप्रेक्षपैव प्रवृत्तः॥ इह तत्वनुमंत्रण निबंधनो भिचारो नानु
याज निबंधनः॥ अनुमंत्रणं च पुरुषार्थत्वान्न कृतप्रेक्षमपेक्ष्यते॥ अतो न्यायोपप्रदर्शनार्थं
कृत्वा चिंतेत्येयं॥ अथवा भ्यस्यमानानां होमस्थाल्यादि धर्मसंबंधनिर्णयार्थमिदमधिकर
णं॥ तेन द्वितीयप्रभृतीनां नराशंसानां द्वितीयस्थाने होमः॥ ततो वनस्पतिप्रभृतीनामंस
स्य स्थान इति सिद्धं॥ अत्राहुः॥ पितृभूत्याचार्याः॥ अनुमंत्रणस्य पुरुषार्थत्वाद्विकृतावप्रवृत्ते
र्वचनात्प्रवृत्तिः कृत्वा चिंतावेति॥ एषज्जुहूपभृतो व्यूहति॥ यजति स्थानादागत्य स्रुचौ स्वस्था
ने सादयत्यध्वर्युः॥ ततो यजमान एष स्वस्थानाद्वेदेः पश्चादागत्य जुहूपभृतो व्यूहति॥ ऊह
वितर्के॥ अत्र प्रेरणे द्रष्टव्यः॥ विविधमन्योन्यविपरीतं ऊहति प्रेरयति जुहूपमन्यस्यां दिशि
उपभृतमन्यस्यामिति विशाब्दस्यार्थः॥ कथं व्यूहतीति विशेषापेक्षायामाह॥ अग्नीषोमयो
रिति जुहूं प्राचीं दक्षिणेनोत्तानेन॥ अग्नीषोमयोरुज्जितिमित्यनेन मंत्रेणोत्तानेन दक्षिणेन
पाणिना हस्तेन जुहूं प्रस्तरात्प्राचीं व्यूहति॥ प्रेरयति॥ सर्वे स्रुचौ व्यूहत्यग्नीषोमयोरुज्जि
तिमनूज्जेषं वाजस्य मा प्रसवेन दक्षिणेन पाणिना प्रोहामीति जुहूं प्राचीं दक्षिणेन पाणिने
ति श्रुतेः॥ अत्राग्नीषोमग्रहणं मंत्रे न्यायप्राप्तप्रधानदेवतामात्रोपलक्षणार्थं॥ अग्नीषो
मौ तमितीतरेतेणेतरां नीचां प्रतीचीं॥ अग्नीषोमौ तमपनुदतां मिति मंत्रेणेतरेण सव्येन पा
णिना नीचां सुज्जेन प्रतीचीमुपभृतं व्यूहती प्रतीच्यां दिशि बहिर्वेदि प्रेरयति प्रागग्नामेव

गि

श्री २६ सतीमिसर्पः॥अग्नीषोमोत्तमपनुदत्तां योस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहा
सीमि स्रूपन्नतं प्रतीचीं सव्येन पाणिना यदि स्वयं यजमानो गृह्णीते॥अत्रापि मंत्रे अग्नीषो
मग्रहणं प्रधानदेवतामात्रोपलक्षणार्थं॥ततश्चैवं प्रयोगः॥अग्नीरग्नीषोमयोरग्नीषो
मयोरुज्जितिमिति॥अग्निरग्नीषोमावग्नीषोमौ तमपनुदंत्विति॥अत्र मतभेदः॥
प्रैषव्यतिरिक्तस्योपांशुत्वेपक्षे उपांशुयाजपुरोडाशयोर्देवताभूतयोर्द्वयोरग्नीषोम
योस्तंत्रेणोच्चारणं गुणभेदाभावात्॥शेषमुक्तमनेनैव नानुयाजप्रभृति मंत्रमात्रस्यो
त्तमस्वरविधानपक्षे च गुणभेदाद्भेदेनोच्चारणं॥तदा चोपांशुयाजाग्नीषोमयोरुपां
शूच्चारणं॥पुरोडाशदेवतयोरुच्चैरिति॥एवं सर्वत्रोपांशुदेवतेषु अन्यदेवतासहितेषु
षूह्येयं॥आपस्तंबसूत्रे विशेषः॥प्राचीं जुहूं प्रोहति सव्येनोपभृतं प्रतीचीं बहिर्वेदि नि
रस्य प्राश्ये नाम भुदाहसस्येति॥मानवे च॥विषूचीव्यूहति॥प्राचीं जुहूं प्रस्तरात्॥प्र
तीचीमुपभृतं बहिर्वेदि निरस्य सम्भक्ष्य प्रसासादयति न जुहूं प्रेरइति॥जुहूश्च प्रस्त
रतो बर्हिषि सादनीया॥प्रस्तरस्यादानविधानादिति सन्निप्रायः॥काठकेपि॥प्राचीं जुहूं
प्रतीचीं बर्हिर्वेद्युपभृतमभ्यक्ष्याहसवे घानि धायेति॥यथादेवतमन्यत्॥अग्नीषोम
योरित्येवं व्यूहनप्रकारदर्शनार्थमुक्तं॥अन्यदपि यथादेवतं व्यूहति॥यायादेवता अन्या राम
भवति तस्या अपि षष्ठ्यंतं नामकीर्तयित्वा जुहूं व्यूहति प्रथमांतं कीर्तयित्वा चोपभृतमिति॥ २६
एवं यथादेवतव्यूहतीति श्रुतत्वात् तेनाग्नेयपुरोडाशदेवताया अग्नेः उपांशुयाजदेव

तायाअग्नीषोमीयस्यविष्णोश्चसांनाय्यदेवतायाइंद्रस्यमहेंद्रस्यचमंत्रमध्येकीर्तनंसि
द्धं॥ततश्चामावास्यायांसान्नाय्ययाजिनोग्नेरग्नीषोमयोरिंद्रस्येतिअग्निरग्नीषोमाविं
द्र इतिव्यूहनमंत्रौ॥असांनाय्ययाजिनस्तुअग्नेर्विष्णोरिंद्राग्न्योरुज्जितिमग्निर्विष्णुरिं
द्राग्नीतमपेसेववियौमंत्रौ॥पौर्णमास्यांतुप्रदर्शितौ॥ननुएवंयथादेवतंव्यूहतीति
सामान्येनोक्तत्वादाज्यभागप्रयाजादिदेवतासंकीर्तनमपिसूक्तवाक्यावाहनादिवत्कस्मा
न्नभवतिउच्यते॥मंत्रपाठेप्रधानदेवतयोरेवाग्नीषोमेंद्राग्न्योःपाठादेवंयथादेवत
मित्यत्रैवंदेवशब्देनप्रधानदेवतानामेवव्यूहनप्रकारस्योपदेष्टुंवाक्यत्वात्प्रधानदेवताना
मेवसंकीर्तनेनव्यूहतिनामदेवतासंकीर्तनेनेत्येवमवसीयते॥अत्रहरिस्वामिभिरेवंप्रयो
गोदर्शितः॥अग्नेरग्नीषोमयोरितिपौर्णमास्यां॥अग्नेर्विष्णोरिंद्रस्येतिसान्नाय्ययाजिनइ
ति॥तदभिप्रायस्तुपौर्णमास्यामग्नीषोमयोस्तंत्रेणोच्चारणं॥अमावास्यायांतुसान्नाय्यया
जिनोपिविष्णुरुपांशुयाजइति॥अध्वर्युर्वा॥अथवाध्वर्युःस्रुचौव्यूहति॥नस्वयंजमानः
एवम[illegible]पिश्रुतत्वात्॥तत्रजुह्वाव्यूहनमंत्रेविशेषमाह॥अनुऽजयत्वयंयजमानोवा॥
जस्येनमितिपूर्वे॥पूर्वेजुहूव्यूहनमंत्रेउज्जितिमनूज्जयत्वयंयजमानोवाजस्यैवंप्रसवे
न॥प्रेहासीतिविशेषः॥कुतः॥यद्युअध्वर्युरग्नीषोमयोरुज्जितिमनूज्जयत्वयंयज
मानोवाजस्यैनंप्रसवेनमोहामीतिश्रुतेः॥अथोपभृद्व्यूहनमंत्रेविशेषमाह॥प्रमयं
यजमानोद्वेष्टियश्चैनंद्वेष्टीत्युत्तरे॥अध्वर्योर्व्यूहनपक्षे॥उत्तरेउपभृद्व्यूहनमंत्रेतम

श्री
२८

पनुदंतुयमयंयजमानोद्वेष्टियश्चैनंद्वेष्टिवाजस्यैनंप्रसवेनापोहामीसर्वैर्विरोधोभ
वति॥अग्नीषोमौतमपनुदतांयमयंयजमानोद्वेष्टिवाजस्यैनंप्रसवेनापोहामीतिपौर्ण
मास्यामितिश्रुतेः॥अथामावास्यायामितिप्रकृतेपौर्णमासवदेवयजमानाध्वर्युकर्तृकोभ
यविधस्यापिपूर्वमेनस्यश्रवणात्॥सोमश्चसोमस्तमपनुदंत्वितिबहुवचनदर्शनात्प्रकृतावपिव्यू
हनेबहुवचनंप्रयुज्यतइतिगम्यते॥मंत्रपाठेद्विवचनंयथाप्राप्तस्योपलक्षणार्थं॥अग्नीषोमग्रहण
वत्॥अनेकयजमानकेतुव्यूहनस्ययजमानकर्तृकत्वपक्षेइतरान्वारब्धएकएवव्यूहति॥अनु
त्तीयास्त्ववाजस्यावांप्रसवेनेतिद्वयोः अनुत्तीयास्मवाजस्यान्प्रसवेनेतिबहुषु अध्वर्युकर्तृ
कपक्षेपि॥उज्जितिमनूत्तयतमिमौयजमानौवाजस्येनौप्रसवेनप्रोहामितमपनुदतांयमि
मौयजमानौद्विष्टोयश्चैनौद्वेष्टिवाजस्यैनंप्रसवेनापोहामीतिद्वियजमानके॥बहुयजमान
केउज्जितिमनूत्तयंतिमेवयजमानावाजस्यैनान्प्रसवेनप्रोहामि॥नुदतांयमिमेयजमानाद्वि
षंतियश्चैनान्द्वेष्टिवाजस्यैनंइत्यादि॥व्यूहनंचेष्टदेवतासंकीर्तनेनदृष्टार्थंकृतप्रयोजनस्य
क्संस्कारार्थंच॥अतश्चानिष्ट्यापसस्यस्यादेयावद्युक्तानापच्छिन्नेष्वपिभवति॥तत्रापिस्व
चोदेवतायाश्चसंस्कारस्येष्टत्वात्॥अतएवाहसूत्रकारः॥व्यूहनपरिध्यंजनेस्वतैकइति॥अनु
कृत्स्नानापन्नानांतश्चपर्णार्कपर्णदोहनोदुंबरस्रुवादीनामपिव्यूहनंभवतिवसाहोमवहवन्याः एष राम
दाज्यापन्नत्वश्च॥उपपन्नत्स्नानापन्नत्वात्॥अम्नुक्स्रजुह्वापरिधीननक्तियथापूर्वंवसुम्नइति २८
प्रतिमंत्रंव्यूहनानंतरंस्रुचावप्नुक्स्रस्रुस्नानेप्रसानीयजुह्वाकरणभूतयायथापूर्वमित्युप

धानक्रमेण परिधीनन‌क्ति वसुभ्यइति प्रतिमंत्रमेकैकं ॥ अथ जुह्वा परिधीन् समनक्तीति श्रुतस्य सर्व
स्य श्रुतत्वात् ॥ परिध्यंजनं च वेदोपग्रहणेन कार्यं न च रुद्रेभ्यस्त्वेत्यत्रापामुपस्पर्शनं मंत्रस्यारौ
द्रत्वात् ॥ वसुभ्यस्त्रयाणां परिधय इति कात्यायनेन परिधिदेवतात्वस्योक्तत्वाच्च ॥ अत्रो भयोः स्रु
चोरस्रुक्षण प्रस्रासासादनरूपः शास्त्रांतरीयो विशेषो ग्नीषोमीयेतमिनस्मिन् तन्त्रे उक्त इति नेह पुन
रुच्यंते ॥ प्रथमं परिधिं गृहीत्वाश्राव्याहेषिता इत्यादि ब्रूहि संततं ॥ परिध्यंजनानंतरमध्वर्युः प्र
थमं परिधिं गृहीत्वा श्राव्याहेषिताऽ इत्यादिकं प्रैषं होतारं प्रत्याह ब्रवीति ॥ अथ परिधिमभिप
द्याश्रावयतीति स आश्राव्याहेषितादिव्या होतार इत्यादेः श्रुतत्वात् ॥ अभिपद्याभिगम्य हस्तेना
लभ्येत्यर्थः ॥ इष्टा इषिताः संति होतार इत्यर्थः ॥ आश्रावणार्थमेतत्परिधिग्रहणं ॥ ततश्चाश्रावणा
भावे दर्विहोमेषु न भवति ॥ परेशोऽप्रैष्यति ॥ यसौ सूक्ता ब्रूहीत्यस्य स्थाने सूक्ता प्रैष्येत्येवं मैत्रावरुणं
प्रत्याह ॥ न च सूक्ता ब्रूहीत्येवं होतारं प्रतीति ॥ संज्ञानाथ्यामिति प्रस्तरादानं ॥ प्रैषानंतरमध्वर्युः सं
ज्ञानाथामिति मंत्रेण प्रस्तरादानं कुर्यात् ॥ हस्तेन प्रस्तरस्य ग्रहणं कुर्यात् ॥ एतेनैवादद्दीन संज्ञा
नाथामिति श्रुतेः ॥ विधृतीस्थाने कृत्वा नत्वैनं व्यंतु वय इति ॥ ततो विधृती तृणे स्थाने कृत्वा बर्हि
षोयस्मात्स्थानाद्गृहीतं तत्रैव निधाय ततएनं प्रस्तरं व्यंतु वय इत्यनेन मंत्रेणाग्नमध्यमूलेषनक्ति ॥
तदुक्तं मानवे ॥ प्रस्तरमपादत्ते बर्हिषि विधृती प्रसव स्यजतीति ॥ आपस्तंबोपि ॥ प्रो ॥ क्षेनोमस्रुदा
हृसजुह्वापरिधीननक्ति वसुभ्यस्त्वेति प्रथमं रुद्रेभ्यस्त्वेति दक्षिणमादित्येभ्यस्त्वेत्युत्तरं न प्रस्तरेजु
हूं सादयति संज्ञानाथ्यामिति विधृतीभ्यां प्रस्तरमपादाय बर्हिषि विधृती अपि सृज्य स्रुक्ष्व

श्री प्रस्तरमनक्तीति ॥ कथं प्रस्तरमनक्तीत्यपेक्षायामाह ॥ अग्रं जुह्वां ॥ जुह्वां प्रस्तरस्याग्रमनक्ति ॥
२८ उपभृति मध्यं ॥ उपभृति प्रस्तरमध्यमनक्ति ॥ मूलं ध्रुवायां प्रस्तरस्य मूलं ध्रुवायामनक्ति ॥ त्रिष्वपि
स्थानेषु व्यन्तु वय इत्ययमेवांजनमंत्रः ॥ स वा अग्रं जुह्वामनक्ति मध्यमुपभृति मूलं ध्रुवायामि
ति सोनक्ति व्यंतु वय इति श्रुतेः ॥ मरुतामिति नीचैरुक्त्वा तृणमादायानुप्रहरति ॥ मरुतामित्यने
न मंत्रेण तमक्तं प्रस्तरं स्रुचोर्दक्षिणेन चापरेण चानीयाहवनीयं प्रति नीचैरपि संलग्नमिव
हृत्वा आहवनीयसमीपमानीय ततः प्रस्तरादेकं तृणमादाय पृथक्कृत्वा जुह्वा प्रस्तरमनुप्रह
रति प्रागग्रमुदगग्रं वा आहवनीय एव ॥ प्रक्षिपति तं नीचैरिव हरति सरं हरति मरुतामिति
अथैकं तृणमपगृह्णाति तन्मुहूर्तं धारयित्वानुप्रहरति प्रांच मनुसमस्यति अथोऽदंचमिति
च श्रुतत्वात् ॥ आपस्तंबः ॥ अनूच्यमाने सूक्तवाके सह शाखया प्रस्तरमाहवनीये प्रहरति न स्वा
हाकरोति न विधूनोति न विक्षिपति न प्रमार्ष्टि न प्रतिमार्ष्टि नानुमार्ष्टीति ॥ तथा ॥ तिर्यंचं हस्तं
धारयन्नुत्कर्षन्निवाहवनीये प्रहरतीति ॥ अंजनानंतरं प्रस्तरः स्रुचां दक्षिणतः पश्चाद्यनेयः
सुक्ष्वर्तमानस्यान्यस्य हविष्ठा ॥ प्रस्तरस्य पात्रत्वात् ॥ हविष्पात्रस्याप्रत्तिजामित्यनेन पात्रस्य
हविष्ठाबहिर्भावोपदेशात् ॥ हस्तेनाचरति ॥ आचरणं चोपसमूहनं अग्निमध्ये प्रेरणं त
च्चात्र हस्तेन विधीयते ॥ अग्नौ हुतं प्रस्तरं हस्तेनाचरति प्रेरयति ॥ हस्तेनाप्यंगुलिभिरेव राम
यो पुष्येरन्न काष्ठैरिति श्रुतेः ॥ युपविमोहने ॥ पुनः पुनः संमूर्छयेयुः हस्तेनैव प्रेरयेयुरित्य २८
र्थः ॥ यजमानभागं च प्राशित्वे ॥ यजमानभागं च [illegible] हस्तेनैव जुहोति प्राशित्वे रुत

प्रवासेयजमाने॥चकारोहस्तेनेत्यस्यानुकर्षणार्थः॥क्षत्रियोवैश्यस्योऽश्वनिसं॥क्षत्रियोवैश्य
योर्वाजमानयोर्निसंप्रोषितेऽप्रोषितेचयज्ञमौनेयजमानभागंहस्तेनैवजुहोति॥अहंत्वद
स्मीति॥अयंसर्वेषांब्राह्मणादीनांभागहोममंत्रः॥स्वाहाकारांतत्वात्॥सन्निधानाच्च॥अतश्च
मंत्रवर्णाजातवेदसोदेवतात्वं॥ततश्चेदंजातवेदसइतिसागः॥सूक्तवाकांते॥प्रस्तरानुप्रह
रणंयजमानंहवनंचैतदुभयंसूक्तवाकांतेभवतिकुतः॥सूक्तवाकेनप्रस्तरंप्रहरतीतिन्याख्यां
तरात्॥अत्रसूक्तवाकप्रस्तरप्रहरणयोरंगांगिलक्षणःसंयोगः॥कुतएतत्सूक्तवाकेनेति
करणविभक्त्यानिर्देशात्प्रस्तरमितिचकर्मविभक्त्या॥सूक्तवाकएवप्राज्या॥प्रस्तरआहुति
रितिशास्त्रांतरेश्रवणाच्च॥तत्रायंयागःप्रस्तरद्रव्यस्याग्न्यादयोदेवताइतिगम्यते॥अयमे
व॥जैमिनेरपिसिद्धांतः॥तेनसूक्तवाकांतेजुह्वाप्रस्तरमाहवनीयेजुहोति॥इदमग्नयेसोमा
ग्नयेषोमाभ्यामग्नीषोमाभ्यांदेवेभ्यआज्यपेभ्योग्नयेहोत्रायेसेवंसागश्चकर्तव्यः॥आतिथ
थ्योपसत्सिआदौचप्रस्तरप्रहरणाभावेपिवचनात्सूक्तवाकस्यप्रयोगः॥तथाचपित्र्यायांश्रूय
ते॥परिधिममिपधाश्वाव्याहेषिनाइत्यादि॥कर्कमतेतुविपरीतं॥कालार्थोपिसंयोगः॥प्र
स्तरस्यहस्तेनैवाहवनीयप्रक्षेपमात्रं॥सागावाश्चेतिप्रस्तरहोमानंतरंमेवहस्तेनयजमान
भागोहोतव्यः॥केचित्तुयजमानस्यभक्षणकालएवतद्भागस्यहोमसिद्धं॥मिच्छंति॥अग्नीद
हानुप्रहरेति॥प्रस्तरप्रहरणानंतरमग्नीदनुप्रहरेसेवमाहध्वर्युंप्रति॥अग्नाग्नीदहानुप्रह
रेतीतिश्रुतेः॥वरुणप्रघासेषत्प्रहरतमिति॥बहुषूदवसानीयासत्प्रहरेतेति॥पूर्वत्रप्रैष

श्री ध्वर्योः॥ कर्त्तव्यस्थापितत्वादग्नीदिति वचनं॥ पास्य तृणं चक्षुष्या इत्यात्मानमालभते॥ ततो
२९ ध्वर्युः प्रस्तराद्गृहीतं तृणमाहवनीये प्रास्य प्रक्षिप्य चक्षुष्या इत्यनेन मंत्रेणात्मानमालभते॥ इ
दयं दक्षोऽस्यानि ततोऽप उपस्पृशतीति च॥ तूष्णीमेवानुप्रहृत्य चक्षुष्या अग्नेऽसि चक्षुर्मे पाहीत्या
त्मानमुपस्पृशतीति श्रुतेः॥ संवदस्वागानग्नीदगन्धव य श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मा
नुषेभ्यः शं योर्ब्रूहीति तेषां संवदस्वागं श्रौषडित्यग्नीत्प्रेषपितेरो व्यसास्संब्रूतः॥ संवदस्वेत्या
दीनां यथाक्रमं पठितानां एतेषां मध्ये संवदस्वागन् श्रौषडित्येतान्यग्नीद् ब्रूयात्॥ शेषमवशिष्ट
मगानग्नीदगन्व य स्वगेत्येतत् पितरोऽध्वर्युर्ब्रूयात्॥ उभावपि वनिरंतरं किं तु व्यसास्संब्रूतः॥ ए
वं संवदस्वेत्यग्नीदाह॥ ततोऽध्वर्युरगानग्नीदिति ततोऽग्नीदगं॥ निति ततोऽध्वर्युः श्रावयेति
तोऽग्नीत् श्रौषडिति॥ ततोऽध्वर्युः स्वगा दैव्या होतृभ्य इत्यादि॥ मंत्रार्थस्तु॥ अग्नीदध्वर्युं प्रेष्यति
संवदस्व त्वं मया सह शंयुवाकप्रैषार्थमिति॥ ततोऽध्वर्युः पृच्छति किमगमत्प्रस्तरश्शरीरो यज
मानः स्वर्गं लोकं॥ किं दग्धः प्रस्तर इत्यर्थः॥ अग्नीत्त्वगन्निति प्रतिवचनं ददाति॥ गतो यजमा
नः दग्धः प्रस्तर इत्यर्थः॥ अध्वर्युस्तदाह॥ यद्येवं ततः शंयुवाकपरिधिप्रहरणयोः कालो वर्तते॥
ततश्च श्रावय होतारमाकर्णयेत्यर्थः॥ अग्नीत्त्वाह श्रौषट्॥ शृणोत्येवायमवहितो ब्रूहि त्वं प राम
द्विवक्षितमिति॥ स्वगा दैव्या होतृभ्य इति शंयुवाकप्रैषः॥ हे होतः॥ शंयोर्बार्हस्पत्यस्य रूपेण रा २९
णं ब्रूहि स्वगा स्वस्थानगामितं देवेभ्यो होतृभ्यः परिधित्रारीरेभ्यो होतृपंतां परिधयः इत्यर्थः॥ मा
नुषेभ्यः होतृभ्यः स्वस्तिरविनाशोऽस्त्वित्येवंरूपं वाक्यं ब्रूहीति॥ अयं तावद्वाक्यार्थः॥ अक्रतिस्तु

गूढमर्थान्तरमाह॥ परिधीननुप्रहरति यं परिधिमिति प्रथममभितरौ च युगपदग्नेः प्रियमिति
ततोऽध्वर्युहस्तेनैव परिधीनाहवनीयेऽनुप्रहरति प्रक्षिपति तत्र प्रथमं परिधिमन्त्रेण प्रक्षिपति
इतरौ च दक्षिणोत्तरौ परिधी युगपत्सहैव हस्तेनानुप्रहरति अग्नेः प्रियमिति मन्त्रेण॥ अथ प
रिधीननुप्रहरति समध्यममेवाग्नेः परिधिमनुप्रहरति यं परिधिमिति अग्नेः प्रियं पाथोपीतमिति
तरावनु समस्यतीति च श्रुतत्वात्॥ स्रुचौ प्रगृह्णाति सं स्रावभागा इति संस्रावं जुहोति॥ ततो
ऽध्वर्युः स्रुचौ जुहूपभृतौ प्रगृह्णाति उभाभ्यां हस्ताभ्यां गृह्णाति गृहीत्वा च संस्रावभागा इति मन्त्रे
ण ताभ्यां स्रुग्भ्यां संस्रावं जुहोति॥ मन्त्रलिङ्गात्तत्र विश्वेषां देवानां देवतात्वं॥ स वै विश्वेभ्यो देवेभ्य
इति वाक्यशेषात्॥ ततश्च जुहोति विश्वेभ्यो देवेभ्यः स्वाहेति प्रयोगः उभयोः स्रुचोः प्रग्रहणवच
नादुभाभ्यामपि होमः॥ अन्यथोपभृतो जुह्वां समानीय होमः स्यादिति॥ अथ जुहूं चोपभृतं च सं
प्रगृह्णाति स वै विश्वेभ्यो देवेभ्यः संप्रगृह्णातीति श्रुतत्वात्॥ मन्त्रस्तु संस्रावहोमेन प्रग्रहणे स्वाहाव
डितित्त यथा वषट्कृतं हुतमेवमस्यैतद्भवतीति श्रुतेः॥ प्रतिपत्त्यर्थकर्म चैतत्॥ ततश्चांतापच्छि
न्नेयावदुक्ते च प्रवर्तते॥ संस्रावाणामविशेषितत्वान्नाज्यसाधनकयागांगता॥ ततश्च सर्वत्र
प्रवृत्तिः॥ घृताची इति धुरि ति दधानसि चेद्ग्रहणं॥ घृताची स्थ इत्यनेन मन्त्रेणाध्वर्युरनसो
धुरि स्रुचौ निदधाति स्थापयति॥ चेद्यदि अनसि हविर्ग्रहणं आहृतं भवति॥ सयस्यानसो ह
विर्ग्रहणं स अनस्तस्य धुरीति विमुञ्चतीति श्रुतेः॥ चरितार्थत्वात्स्रुक्संस्कारोऽयं॥ तेनांतापच्छि
न्नयावदुक्तयोरपि भवति॥ पशौ स्रुग्वकुत्वे सर्वासां धुरि ति निधानं॥ घृताची स्थ धुर्यौ पातसु

श्री न्नास्त्व सुम्ने माधत्तेति वोहः॥ गृहमेधीयायामेकस्यां जुह्वां घृतान्यासि धुर्यौ पाहि सुम्नास्मि सुम्ने
३० माधेहीति विक्षेपः॥ स्फ्यपात्रं चेत्॥ वेद्यदि पात्रं हविर्हरणं कृतं तदा स्फ्ये वज्रेण उत्तरांसे दक्षिणे
उद्गम्य निहितेस्त्रुचो सादयति प्रागग्रेएव॥ यस्योपात्रे स्फ्येन स्येति श्रुतेः॥ अत एव वरुणप्र
घासेऽभौ स्रुचः संप्रग्रह्य स्फ्ये सादयत इति नियमात्सा आ एव हविर्ग्रहणं नियमेनावसीयते॥
हविर्ग्रहणाभावे चोपसत्सु पस्यो होमभावे वदनि॥ ध्यानेन स्फ्येन चानसि॥ पत्नेन मश्व त इति
वेदिमालभते॥ मंत्रलिंगाद्यजमानो वेदिमालभते॥ पत्ने न मश्व त इति मंत्रेण॥ सपत्न्यां यो
राह तदभिमृशा[illegible]तिय तन नमश्व त उपचेति श्रुतेः॥ स चायं वेदिसंस्कारो वेदिमिति द्वितीया
विभक्त्या वेदेः संस्कार्यत्वावगमात्॥ स च समिष्टयजुर्होमार्थत्वोपयुक्तत्वान्नश्व समिष्टयजु
षो भावे न भवतीति कर्कः॥ अन्ये तु स यत्र क्वायो राह तदभिमृशातीति क्वांयो वा कस्य हनावश्व
णाछयो वाका भावे न भवती साहु॥ अपरे त्वाहुः॥ स यद तिरश्चयति तन्नमस्कारेण नामयतीत्या
द्यर्थवादादभिमर्शनस्यान्यूनातिरिक्तिनामनार्थत्वावगमात्समिष्टयजुरभावेपि शंयोर्वाका
भावे पि सर्वत्राभिमर्शनं भवतीति॥ युक्ततरं मिव चैतद्भाति॥ आपस्तंबसूत्रे यं पदार्थो या
जमानकांडे पठितोस्ति॥ वेदः होता स्त्रिकः स्रुवमध्वर्युराज्यस्थालीमग्नीदादाय पत्नीसंया
जेभ्यो गार्हपत्यं संगच्छंति॥ ततो होता स्वयमेव वेदमादाय अध्वर्युः स्रुक्स्रुवमादाय अग्नीदा राम्
ज्यस्थालीमादाय पत्नीसंयाजेभ्यः पत्नीसंयाजार्थं गार्हपत्यं संप्रति एते गच्छंति॥ तेवै पत्नीः सं ३०
याजयिष्यंतः प्रतिपरायंतिजुहूं च स्रुवं चाध्वर्युरादत्ते वेदः होताज्यविलापनीमग्नीदि

निष्क्रमतेः॥तत्राध्वर्योर्गमनागमनमार्गमाह॥अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य॥अध्वर्युर्गार्हप
त्यं पूर्वदक्षिणेनैत्य गार्हपत्यदक्षिणाग्न्योरंतराले नागत्य पत्नीसंयाजेष्वरति तस्मादु पूर्वेणै
व गार्हपत्यमंतरेणाहवनीयं चेतीत्यादिश्रवणात्॥पूर्वेण॥अथवाध्वर्युराहवनीयं पूर्वेण
परीत्य दक्षिणतो वितानं गार्हपत्यं गच्छति॥तदेकेषामध्वर्युः पूर्वेणाहवनीयं पर्येति। तिष्क्र
तेः॥अपरेणांतरेण पत्नीमेकेषां॥अथवाध्वर्युरपरेण गार्हपत्यं यजति देशं प्रतिगच्छति॥
अथाद्यन्येषां मते पत्न्यावास्यतइति सिध्यति जघनेनाहेव पत्नीमेकेषामध्वर्युरेती॥ति॥त
थांतरेणाहेव पत्नीमेकेषामध्वर्युरेती॥ति च श्रवणात्॥पत्नीनु गार्हपत्यमेनैर्ऋत्यामुपवि
ष्टा॥अध्वर्युणा च गार्हपत्यस्य दक्षिणतो गंतव्यं गार्हपत्यमपरेण वा॥अतो विकल्पांतरेण वा
स्थेन वा प॥नत्नीमिति॥स्रुक्स्रुवग्रहणमुपभरणार्थं प्रासा याउपभृतोनिरासार्थं॥अत्रा
हापस्तंबः॥आज्यलेपान्प्रक्षाल्य स्रुवं जुहूपभृतावध्वर्युरादत्ते वेदं होता स्फ्यमाज्यस्था
लीमुदकमंडलुं चाग्नीध्र आग्नीध्रप्रथमाः पत्नीसंयाजयिष्यंतः प्रसंचोयंत्यग्रेण गार्हपत्यं
दक्षिणेनाध्वर्युः प्रतिपद्यते। उत्तरेणेतरावितिस्रुग्भ्यां स्रुवेण च पत्नीः संयाजयंति वेदमुप
भृतं कृत्वा जुह्वा स्रुवेण चेसे परेण गार्हपत्यमूर्ध्वज्ञुरासीना ध्यानेन चोपांशुना पत्नीः सं
याजयंति दक्षिणाध्वर्युरुत्तरत आग्नीध्रो मध्ये होतेति॥एवं सर्वसूत्रांतरेषु॥उपविश्य द
क्षिणं जान्वाच्य॥अध्वर्युर्गार्हपत्यस्य दक्षिणतईशानाभिमुख उपविश्य दक्षिणं जान्वा
च्य भूमौ पातयित्वा सोमादीन्यजति॥यजंतित्वातिष्ठद्धोमे प्रासवचनादुपविश्य दक्षिणं जा

श्री ३१ न्वारभेति॥एवंच सर्वत्रोपविष्टहोमेषु॥नकेवलमत्रैवं॥सर्वत्रैषूपविष्टहोमेषुपूर्वाधारे दक्षिणा
ग्निहोमकर्मापवर्गहोमयूपाकृतिसावित्रहोमादिष्वेवंभवति॥एवमिस्रूपविश्यदक्षिणं
जान्वाच्येतिगृह्यते॥उपांशुचरंति॥पत्नीसंयाजेरुपांशुचरंति॥तेवाआज्यहविषोभवंति
तेनोपांशुचरंतीतिश्रुतेः॥चरणशब्दे सर्वं॥यत्र चरणशब्दोविधिवाक्येतत्रसर्वमुपांशु
भवति॥यथामहापितृयज्ञे॥तेनोपांशुचरंतीति॥पितृयज्ञउपांशुचरणमिति॥पुनरा
धेयेपंचकपालेचतेनोपांशुचरंतीति॥ पांशु चरंति॥उपांशुचरंतिप्रागग्नीषोमीयादि
ति च॥देवतान्यत्र॥अन्यत्रेति॥चरणशब्दादन्यत्र॥यत्रचरणशब्दोनभवतियथोपांशुप्र
करणेऐंद्रः सौत्रामण्यांप्रथमोवायोधसम्भेतिदेवसूदेविकाहवीषितन्नूहवीषीति च॥
तत्रदेवतोपांशुभवतिनान्यत्॥यजतिसोमंत्वष्टारंदेवानांपत्नीरग्निंगृहपतिमिति॥स्थाल्या
नयनस्यदृष्टार्थत्वात्॥स्थालीस्रुचेनाज्येनचतस्रोदेवतायजतिसोमंप्रथमांत्वष्टारंद्वितीयं
देवानांपत्नीस्तृतीयां॥अग्निंगृहपतिंचतुर्थमिति॥चतस्रोदेवतायजं~~सोमंप्रथमांस्त~~
तीतिप्रकृसत्वावाआज्यहविषोभवंतिअथसोमंयजतिअथत्वष्टारंयजति॥ अथदेवा
नांपत्नीर्यजति॥अथाग्निंगृहपतिंयजतीतिश्रवणात्॥तृतीयेंतर्धानंपुरस्तात्॥तृती राम
येपत्नीसंयाजेपुरस्तात्कटादिनाअंतर्धानंकरोति॥सयत्रदेवानांपत्नीर्यजतितत्पुरस्तात्ति ३१
रःकरोतीतिश्रुतेः॥पत्न्यन्वारभतेध्वर्युं॥अधिकारात्तृतीयएवपत्नीसंयाजेपत्न्यध्वर्युम
न्वारभते॥सचायमध्वर्युसंस्कारोद्वितीयानिर्देशात्॥अतःपत्न्यभावेपियेनकेनचित्कर्तव्यः॥

शंय्वंतंभवतीडांतंवा॥वाशब्दस्यशंय्वंतेनसंबंधः॥तेनायमर्थः॥तदिदंपत्नीसंयाजाख्यंकर्म
इडांतंभवत्येव॥शंय्वंतंवाभवतिआयुर्भवतिनवेत्यर्थः॥कुतएवं॥तदिदमिडांतंभवतीतिनियमेने
डांतंश्रूयते॥तथाउत्तरोपरस्यैवरूपंक्रियतेसमयदिप्रस्तरस्यरूपंकुर्याद्विदस्यैकंतृणमाच्छिद्येत्से
वमादिकंकर्मयदित्याद्वादिकल्पेनविधीयते॥नतस्मिन्गृहपतियागानंतरंपूर्ववदिडांपंचावत्ता
माज्येनावदायेडांहोत्रेप्रदायाविसृजंदक्षिणातिक्रामन्निरडांप्रतिगृह्यहोतुरंगुलिपर्वणी
अनक्त्ययांतरेडामादध्यातिपूर्ववदिडांचसर्वेन्वारभंतेमयीदमितियजमानोजपत्सूपहू
तांप्राश्नंतियुक्त्वायजमानस्यपवित्रयोरभावाद्दर्भैर्मार्जयंतेपरेणवेदिंसुमित्रियानइत्येता
वदिडांतंभवतीसनेनगृह्यतइतिकर्कान्वार्याद्दयः॥काठकेचतुर्गृहीतं॥मिडामवदायहो
तुःस्रुवेणांगुलिपर्वणीअनक्तिअपरमग्नेयपूर्वंतस्यपाणौपंचबिंदूनिडामवदायहोत्रे
इडामादध्यात्स्रुवपहूयमानामिडांमन्वारभ्यासीनेति॥आपस्तंबमानवसैत्तिरिस्त्रेषुचहस्ते
एवावदानमुक्तंनतिडायां॥तथाचापस्तंबः॥पूर्ववद्धोतुरंगुलिपर्वणीअनक्त्योपस्तृष्टोदका
यहोतुर्हस्तेचतुरआज्यबिंदूनिडामवधातिषडग्नीध्रउपहूयमानान्वारभंतइति॥शास्त्रांतेवे
दस्तृणमादायानक्तिप्रस्तरवत्स्रुचिस्रुवेस्थाल्यांच॥शंय्वंतेकर्मणिक्रियमाणएषविशेषः॥
वेदस्यतृणमादायस्रुचिजुह्वांस्रुवेणस्थाल्यांचप्रस्तरवदनक्ति॥प्रस्तरवदित्यग्रमध्यमू
लानिक्रमेणव्यंतुवयोक्तमितिसंजनमंत्रश्च॥सयदिप्रस्तरस्यरूपंकुर्याद्विदस्यैकंतृणमा
च्छिद्याग्रंजुह्वामनक्ति।मध्यंस्रुवेबुध्नःस्थाल्यामितिश्रुतेः॥अपरेत्वाहुः॥प्रस्तरव

श्री ३२ दिनिवर्त्तिनाग्नेर्मध्यं मूलं चेत्सेनावदेवगच्छतेए तावत एव श्रुतत्वात्॥ न मंत्रोश्रुतत्वादिति॥
अग्नीदाहानुग्रहरेति॥ ततोग्नीदनुप्रहरेत्सध्वर्युंप्रसाह॥ अथाग्नीदाहानुप्रहरेति स्क
32 ने॥ प्रास्यत्तृणादिपूर्ववत्॥ प्रास्यत्तृणं च स्फ्यादसादित्याद्यो ब्रूहीसंतंपूर्ववद्ध। वतिअत्रापि
तथैवश्रुतत्वात्॥ तूष्णीमेवानुपहत्य स च स्रूर्मेपाहीत्यात्मानमुपस्पृशति॥ अथाह संवदस्वेत
गानग्नीदगंछावयश्रौषट्स्वगा दैव्याहोतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीति॥ राधंतेस्रु
कस्रुवंप्रगृण्हासग्नेदक्षायेविति॥ राधंते कर्मणि कृते सति अध्वर्युः स्तोकस्रुवंप्रगृण्हाति
उभयंगृण्हाति होमार्थं॥ अग्नेदक्षायविसनेनसकृत्स्रुवांजुहोति॥ अथ जुहूं च स्रुवं च सं॥
प्रगृण्हाति सवा अग्नये संप्रगृण्हा सग्नेदक्षाय वितिश्रुतेः॥ एतत्तृणांजनादिहोमांतंगार्हप
त्यस्योत्तरतउपविष्टेन कर्त्तव्यं॥ अंतमंत्रवणादग्निरदब्धायुरसीतमोदेवता॥ ततश्चेदम
ग्नयेदधायवेत्रीतमायेतिसाग॥ एतदपिगार्हपत्य एव जुहोति तस्यैव प्रस्तुतत्वात्॥ प्रति
पत्यर्थकर्मचैतत॥ पत्नीसंयाजशेषसाध्यत्वापतदभावेनभवति॥ पत्न्यावपिनभवतिसं
स्त्रवाभावेनार्थलोपात्॥ पत्नीसंयाजानामर्थकर्मत्वाधावदुक्तं॥ तापश्चिन्नेषुनिवृत्तिः॥
सव्येनावृत्यदक्षिणाग्नौजुहोत्यग्नयइतिसरस्वत्याइतिच॥ तं प्रकृतं गार्हपत्यमग्निंसव्ये
नावृत्यासदक्षिणंपरीत्यदक्षिणाग्नेः पश्चादुपविश्यदक्षिणाग्नौ सकृद्गृहीतमाज्यंजुह्वाजु राम
होतिसमिदाधानपूर्वकं॥ अग्नये संवेशायत इति प्रथमामाहुतिं॥ सरस्वत्या इति द्वितीयं॥ ए ३२
तदर्थकर्म॥ ततश्चयावदुक्तं॥ तापश्चिन्नेषु न भवति॥ सव्येनावृत्येत्येतत्सांगपत्नीसंयाजांते

अतीसनिष्क्रमणं॥तेनयद्यागार्हपत्यदक्षिणाग्न्योरंतरालेनागतस्तदैतद्भवति॥नान्यमार्गे
णागमने॥उलूखलेमुसलइति॥७॥पिष्टलेपांजुहोति॥उलूखलेमुसलइत्यनेनमंत्रेण
ध्वर्युःपिष्टलेपामाहुतिंजुहोति॥अधिकारादक्षिणाग्नावेव॥अत्रविप्रतिपत्तिः॥केचि
दाज्येनसरूहहीतेनेच्छंति॥तन्मतेअर्थकर्म॥ततश्चातिथ्यादावंतापच्छिन्नेनभवति॥
पिष्टलेपामितिसंज्ञा॥संव्यवहाराभावेपिअपरेतुपिष्टसंबंधिनोलेपाःपिष्टलेपाः॥तान्
पिष्टलेपांजुहोतीतिपिष्टलेपहोममिच्छंति॥तन्मतेप्रतिपत्त्यर्थकर्मचैतत्॥ततश्चांताप
च्छिन्नेपिप्रवर्तते॥देवताश्चात्रप्रकृताःप्रधानदेवताएवाग्न्यादयः॥मंत्रस्यनादिष्टदेवताक
त्वात्॥तद्यनादिष्टदेवतामंत्रास्तेषुदेवतोपपरीक्षायद्देवतः॥सयज्ञोवायद्यज्ञांगंवातद्देवताभवं
तीतियास्कोक्तेश्च॥आपस्तंबः॥एवंपिष्टलेपानुलूखलेमुसलइति॥मानवेच॥तस्यांपुनर्गृही
त्वापिष्टलेपंद्विरवनमभिधायोलूखलेमुसलइतिजुहोतीति॥पत्नीवेदंप्रमुंचतिवेदोसीति
वेदोसीत्यनेनमंत्रेणपत्नीवेदंप्रमुंचतिविमुंचतीत्यर्थः॥अथवेदंपत्नीविस्रंसयतीतिसूत्रेतः॥
पित्र्यायांचास्यमंत्रस्यवेदबंधनेविमोकेचोहः॥येनत्वंदेववेददेवपितृभ्योवेदोभवति॥अने
कयजमानकेत्वितेनास्मभ्यंवेदोभूयाः इतिबहु॥तेनावाभ्यांवेदोभूयाइतिद्वयोः॥अनेकपत्नी
कएकैवविमुंचति॥परार्थत्वात्॥योक्त्रंचप्रमामुंचामीति॥चकारात्पत्नीयोक्त्रंविमुंचतिप्रमा
मुंचामीतिमंत्रेण॥योक्त्रविमोकोयावदुक्तंतापच्छिन्नेनभवतिवेदविमोकश्च॥कृतप्रयोजन
त्वेनप्रतिपत्तिरूपत्वात्॥स्तृणासावेदेः॥वेदंहोताआवेदेःस्तृणाति॥गार्हपत्यादुत्तरेणवेदिपर्यं

श्री तं॥आउत्रमर्यादायां॥द्रव्यविषयत्वात्तमावेदेः सं स्तृणातीतिश्रुतेः॥आउत्राभिविधौ॥
३३ वेदिं व्याप्येति॥योषा वै वेदिर्वृषा वेदः॥परिगृह्य वै योषा वृषाणं शेत इति वचनादिति
33 हरिस्वामिनः॥शांखायनेनोत्तरेण गार्हपत्यमा बर्हिषः स्तीर्त्वेति॥आपस्तंबः॥तंतुं तन्वन्निति
वेदं होता गार्हपत्यात्संक्रम्य संततमाहवनीयात्॥स्तृणासा वेदेरिति॥मानवे॥होता वेदं स्तृ
मानवेच णासा वेदेरिति॥गार्हपत्यादधि संततमाहवनीयादिति॥अतः शाखांतरवशाद्वेदेरित्य
यमाङ्भिविधौ व्याख्येयः॥ध्रौव्यं च समिष्टयजुर्जुहोति देवा गातुविद इति॥ध्रौवमाज्यं देवा
गातुविद इति मंत्रेण समिष्टयजुर्जुहोति॥अथ समिष्टयजुर्जुहोतीति श्रुतेः॥समिष्टयजु
रिति कर्मणः संज्ञा संव्यवहारार्था॥समिष्टयजुरंतं भवतीत्येवमादौ॥वेदस्य विमुक्तत्वात्कुशो
पग्रहेण॥वातश्चात्र देवता स्वाहा वाते धा इति मंत्रलिंगात्॥ततश्च जुहोतौ वाताय स्वाहेति
होमः॥अर्थकर्मैतदिति कर्कः॥ततश्चांतापच्छिन्नयावदुक्तेषु निवृत्तिः॥प्रतिपत्तिरिति
तंत्रटीकायां ततश्चातापच्छिन्नादिष्वपि भवति॥अत्राहापस्तंबः॥पूर्ववद्ध्रुवामाप्याप्य दे
वा गातुविद इति संततं वै घूर्द्धस्तिष्ठन् ध्रुवया समिष्टयजुर्जुहोति सा मंत्रस्य समापनात्स्वाहा
कारादर्भमुष्टिमनुप्रहरतीति॥काठके च॥वेद्यामूर्द्धस्तिष्ठन् ध्रुवया संस्थितयजुर्जुहो
ति॥देवा गातुविद इति संततं यजमानभागं च प्रवसतः॥समिष्टयजुषा सह प्रवसति जुहो राम
तीति शांखायनः॥आपस्तंबोपि॥यदि यजमानः प्रवसेत्प्रजापतेर्विभां नाम लोक इति ध्रुवा ३३
यां यजमानभागमवधाय समिष्टयजुषा सह जुहुयादिति॥बर्हिः संबर्हिरिति॥संबर्हिरिति

तिती मानवेच स्य ध्रुवामाप्याप्य बर्हिर्वादर्भमपादायां तर्वेद्यूर्द्धस्तिष्ठन् देवा गातुविद इति ध्रुवया संततं समिष्टय
जुहू

मंत्रेणानुद्राबर्हिर्जुहोति॥प्रतिपत्तिरियं चरितार्थत्वात्॥तत्स्थांतापछिन्नेयावदुक्तेचप्रवर्तते॥
अथबर्हिर्जुहोतीतिवचनात्॥वेद्यांप्रणीतानिनयतिपरीसेकत्स्वेति॥अध्वर्युःस्वयमाहवनी
यंपरीसवेदेदक्षिणभागेउदङ्मुखउपविश्यप्रणीताआदायवेदिमध्येआसाद्यतत्रैवनिनयति
कस्त्वेतिमंत्रेण॥अथप्रणीतादक्षिणतःपरीसनिनयतीतिप्रकृतसनिनयतिकस्त्वाविमुंचती
सादिश्रवणात्॥आपस्तंबः॥अंतर्वेदिप्रणीताआसाद्यविमुंचतीतिअतएवपूर्ववेदिमध्येअना
सादनंगम्यतेप्रतिपत्तिरियंचरितार्थत्वात्॥तत्स्थांतापछिन्नेपिभवति॥नात्रशेषादोचप्राय
श्चित्तमात्रं॥पुरोडाशकपालेनकणानपास्यसधःकृष्णाजिनंरक्षसामिति॥पुरोडाशकपालेन
मुख्यत्वात्प्रथमेनअधःकृष्णाजिनंकृष्णाजिनस्याधस्तात्समीपएवकणानपास्यतिउत्करेप्रक्षिपति
रक्षसांभागोसीसनेनमंत्रेण॥अथफलीकरणात्कपालेनाधोधःकृष्णाजिनमुपास्यतिरक्षसांभागो
सीतिश्रुतत्वात्॥अथाजनन्नावैवैभ्यंएतदंधेनमसिप्रवेशयतीतिवाक्यशेषादेभ्यइतिचतुर्थ्यार
क्षसामत्रदेवतात्वं॥रक्षसांराक्षसमितिकात्यायनोक्तेश्च॥ततश्चेदंरक्षोभ्यइतित्यागः॥अपां
स्पर्शश्च॥शाखांतरगतोविशेषस्तुषनिरसनेप्रागुक्तएव॥इयमपिप्रतिपत्तिः॥तत्स्थांतापछि
न्नादोभवति॥पूर्णमात्रंनिनयतिपरीसस्ततं॥ततोध्वर्युराहवनीयंपरीसदक्षिणतउदङ्मु
खोवस्थितःसततंपूर्णपात्रंनिनयति॥सत्त्वसितेयस्तेदक्षिणतःपरीसपूर्णपात्रंनिनयतितथा
स्फुटंभवतीतिश्रुतेः॥पूर्णंनिनयतेसंततमव्यवछिन्नंनिनयतीतिश्रुतेः॥पूर्णंचतत्पात्रंच
पूर्णपात्रंतत्रस्थांविराप्रइतिवाक्यशेषादद्भिःपूर्णमितिगम्यते॥यजमानोंजलिनाप्रतिगृह्णाति

श्री २४ धारयति

संवर्चसेतितदध्वर्युणासततंनिनीयमानंपूर्णपात्रंयजमानःसंवर्चसेतिमंत्रेणांजलिनाप्रतिगृण्हा
ति॥एतदुकदकंहस्ताभ्यांतद्दंजलिनाप्रतिगृण्हातिइतिश्रुतेः॥अत्रग्रहणंग्रभानंनिनयनंतदर्थं॥
तेनप्रोषितेयजमानेयत्रयजमानस्तत्रैवपूर्णपात्रस्यनिनयनंकेनचित्कारणीयंयजमानेनांजलि
नाप्रतिग्रहश्चकार्यः॥मुखंविमृष्टे॥ग्रहणानंतरंयजमानस्तूष्णीमेवमुखंविमृष्टे॥तेनगृहीतेनोद
केनमुखमुपस्पृशतेत्यै शोधयतीत्यर्थः॥अथमुखमुपस्पृशतीतिश्रुतेः॥एतच्चार्थकर्म॥ततश्चां
तापच्छिन्नादोनभवति॥अनेकयजमानकेउपर्युपर्यंजलीकृत्वासर्वैःपूर्णपात्रजलंग्राह्यंविष्णुक्र
मणंचसर्वैःकर्त्तव्यं॥विष्णुक्रमान्क्रमतेदिविविष्णुरितिप्रतिमंत्रं॥ततोयजमानःस्वासनादुत्थायदक्षि
णाद्वेदिश्रोणिदेशादारभ्याहवनीयंयावद्दिविष्णुक्रमान्क्रमतेविष्णुक्रमसंज्ञाक्रमणान्करोतिदिविष्णुरि
तिप्रतिमंत्रंएकैकेनमंत्रेणैकैकंक्रमणंकरोतीत्यर्थः॥अथविष्णुक्रमान्क्रमतइतिप्रकृतस्यसर्वस्य
श्रुतत्वात्॥एतदप्यर्थकर्म॥तेनांतापच्छिन्नादोनभवति॥अत्राहापस्तंबः॥विष्णोःक्रमोसीतिद
क्षिणावेर्ध्यंतेदक्षिणपदाचतुरोविष्णुक्रमान्प्रांचःप्रक्रामत्युत्तरमुत्तरंज्यायांसमनतिहरन्सव्यंन्वा
हवनीयमभिनिक्रामतीति॥मानवे॥दक्षिणयावेदेःप्राचीनंदक्षिणेनपादेनविष्णुक्रमान्क्रामतीति॥
काठकेच॥चतुरःप्रांचःप्रक्रमान्प्रक्रामतिनाहवनीयमभिक्रामेदिति॥शांखायनोपि॥दक्षिणा
णाद्वेदिश्रोणिदेशादाहवनीयंयावदिति॥पृथिव्यामितोनऊर्ध्वंवा॥अथवापृथिव्यांविष्णुरिति राम
प्रथमंक्रामति॥अंतरिक्षेविष्णुरितिद्वितीयं॥दिविविष्णुरितितृतीयमित्येवमितःपृथिवीलो २४
कान्ऊर्ध्वंआरोहणक्रमेणवाविष्णुक्रमान्क्रामति॥तदुक्तंपृथिव्यांविष्णुर्व्यक्रंस्तेतिश्रुतेः॥तद्वा

34

इतएवपराचीनंभूयिष्ठाइवक्रमंतइतिच॥इतोस्माल्लोकात्पराचीनमूर्ध्वंअंतरिक्षंदिवंइसेवंभू
इयिष्ठाबहुतमाःक्रमंतेइत्यर्थः॥परस्तात्तेवावङ्किमेतेत्तिच॥अतउभेयथाश्रवणादिकल्पःप
रस्तादर्वाङ्क्॥अवरोहणक्रमेणदिव्यंतरिक्षेपृथिव्यामिति॥अतऊर्ध्वोवाआरोहणक्रमेणपृथिव्या
अंतरिक्षेदिवइति॥अस्मादन्नादितिभागमवेक्षतेततोयजमानोस्मादन्नादित्यनेनमंत्रेणस्वभा
गमवेक्षते॥स्वस्थानेउपविष्टएव॥अस्मादन्नादित्यत्रनिर्भक्तइत्याद्यनुषंगःसाकांक्षत्वात्॥
अयंचभागसंस्कारः॥तेनांतापच्छिन्नादेभवति॥अतएवानेकयजमानकेष्वेकःकरोतिस्वा
न्त्रावेक्षणमित्यन्ये॥एककर्तृकावेक्षणपक्षेसर्वेन्वारंभंकुर्युः॥अस्यैप्रतिष्ठायाइतिभूमिं॥
अस्यैप्रतिष्ठायाइत्यनेनमंत्रेणयजमानोवेदिभूमिमवेक्षतेअत्रापिनिर्भक्तइत्यनुषंगःसा
कांक्षत्वात्॥एतदप्यर्थकर्मततश्चांतामपच्छिन्नेनभवति॥अगन्मस्वरितिप्राङः॥पेक्षत
इतिशेषः॥अगन्मस्वरित्यनेनमंत्रेणप्राङ्वीक्षते॥प्राचीदिङ्गंप्रेक्षतइत्यर्थः॥कुतः॥अ
थप्रेक्षतेप्राचीहिदेवानांदिगितिवाक्यशेषात्॥एतदप्यर्थकर्म॥संज्योतिषेत्याहवनीयं॥
अवेक्षतइतिशेषः॥संज्योतिषेत्यनेनाहवनीयममवेक्षते॥एतदप्यर्थकर्म॥अप्रतिपत्ति
रूपत्वात्॥ज्योतिषाहिसंभवमत्रप्रार्थ्यते॥तेनाहवनीयसंस्कारकल्पनंकार्यं॥ततश्चां
नलुप्तेनिवृत्तिरितिकर्कः॥वरुणप्रघासेषुतुवेदिद्वयस्याप्यवेक्षणमग्न्योश्चेतिसंप्रदायः॥
स्वयंभूरितिसूर्यं॥स्वयंभूरसीत्यनेनयजमानःसूर्यमुदीक्षते॥अथसूर्यमुदीक्षतेसउदी
क्षतेस्वयंभूरसीतिश्रुतेः॥वर्चोदाइतियंवाकामंकामयते॥सूर्योदीक्षणानंतरंवर्चोदार

श्री सनेनमंत्रेणसूर्यंप्रार्थयेत्॥अथवायजमानोयंकाममभिलाषंपुत्रपश्वादिकंकामयेत
३५ वांछेवतंब्रूयात्॥गोदाअसिगामेदेहिधनदाअसिधनंमेदेहिपुत्रदाअसिपुत्रंमेदेहीसेवं।
35 वर्चोधादाअसिवर्चोमेदेहीतितेवाहंब्रवीतिनिहस्माहपात्तवक्यस्तथ्येवब्राह्मणेनेष्टव्यं
यब्रह्मवर्चसीस्यादितिस्कनोहस्माहदोयादितेयएषवावमस्यंगादास्पतिगोदागामेदेहीसेवं
यंकामंकामयतेसोस्मैकामःसमृध्यतइतिश्रुतत्वात्॥सूर्यस्याःसावर्त्तते॥प्रदक्षिणं॥
ततःसूर्यस्येसनेनमंत्रेणयजमानःप्रदक्षिणमावर्त्तते॥आवृत्तिभ्रमणंकरोति॥परिभा
षयैवसिद्धेप्रदक्षिणग्रहणमितरथावृत्तिव्युदासार्थंवा॥श्रौतत्वख्यापनार्थंवा॥तेनास्या
पचारेश्रौतंप्रायश्चित्तंभवति॥प्रसंगादाह॥ग्रहग्रहणप्रतिगरहोमेषुचतूष्णीं॥ग्रहग्र
हण)नंतरंप्रसंगासादनात्प्रदक्षिणावर्त्तनंकार्यं॥प्रतिगरदानानंतरंचशस्त्रसमाप्तौ॥
ग्रहा(होमानंतरंच॥एषुग्रहग्रहणप्रतिगरहोमेषुतूष्णींप्रदक्षिणमावर्त्ततेकर्त्ता॥ग्रहं
गृहीत्वैतस्यैवावृतमन्वावर्त्तेतप्रतिगीर्यैतस्यैवावृतमन्वावर्त्तेतग्रहंहुत्वैतस्यैवावृत
मन्वावर्त्ततेतिश्रुतेः॥अत्रापिप्रदक्षिणग्रहणस्यपूर्वसूत्रवत्प्रयोजनंव्याख्येयं॥ससस्त्र
ग्रहेष्वेवायंधर्मः॥नशस्त्रमात्रेप्रतिगीर्यनग्रहग्रहणमात्रे॥नहोममात्रेइ॥ति॥प्रद
क्षिणक्रियानोषत्वान्मंत्रोपिप्रासस्तूष्णीमिसनेनव्यावर्त्तते॥गार्हपत्यमुपतिष्ठतेग्नेगृह राम
पतइति॥ततोयजमानोगार्हपत्यमुपतिष्ठतेगार्हपत्यसमीपेस्थित्वाग्नेगृहपतइतिमंत्रेण ३५
तंप्रकाशयतीत्यर्थः॥अथगार्हपत्यमुपतिष्ठतेसउपतिष्ठतेग्नेगृहपतइतिश्रुतत्वात्॥

एतदप्यर्थकर्मैव॥ ततश्चांतन्तुतादौ न भवति श्रातहिमाऽइति ब्रूयाद्वा॥ गार्हपत्यसमुपस्था
पश्रातं हिमाऽइतीमं मंत्रावयवं यजमानो ब्रूयाद्वा न ब्रूयान्न वेति विकल्पः॥ श्रातऽहिमाऽइति
प्रकृतस्य तदप्येतद्ध्वं नाद्रियेतेति श्रुतेः॥ सूर्यस्येत्यावर्तते प्रदक्षिणं॥ गार्हपत्योपस्थानानंत
रं पुनरपि सूर्यस्येत्यनेन मंत्रेण प्रदक्षिणमावर्त्तते॥ पुनरपि मंत्रपाठमत्॥ अत्रापि पुनर्विधा
नाच्च अथावर्तते सूर्यस्येति॥ गच्छति प्राङुरुविष्णविति॥ उरुविष्णविति मंत्रेण यजमानः प्रा
ङ्गच्छति प्राच्यां दिशि यानि॥ एतदप्यर्थकर्म॥ ततोसीसादिसंततनोत्विति पुत्रस्य नामगृण्हा
तिसेवमंत्रं सत्रं॥ ततोसमुं मंत्रं पठित्वा इदमेकर्मेदं वीर्यं पुत्र इत्यत्र पुत्रस्य नाम प्रथमैकव
चनांतं गृण्हाति इदमेकर्मेदं वीर्यं पुत्रोमुकशर्मानुसंततनोत्विसेवं॥ अयपुत्रस्य नामगृण्हा
तीदं मेयं वीर्यं पुत्रोनुसंततनवदिति श्रुतेः॥ ततोसितंतुरसीत्सततस्मिन्मंत्रे तत्र सव्यादेरेकवा
क्यभूतं गृण्हाति कुतः॥ काण्वसमाम्नानादिदं मे कर्मेदं वीर्यं पुत्रो देवदत्तोनुसंततनोत्वि
ति हरिस्वामिनः॥ अनेकेषु पुत्रेषु सर्वेषां नामग्रहणं प्रतिपुत्रं च ततोसीसावर्तनीयः पु
त्रनामग्रहणार्थत्वात्॥ ज्येष्ठस्य पुत्रस्य नामाभिव्याहरेत् यावंतो वा भवंतीति नारायणः
प्रियस्य पुत्रस्य नाम गृण्हात् आपस्तंबः अनेकयजमानकेषु सर्वैः पुत्राणां नामग्रहणं कार्यं
पुत्रस्याशीःप्रार्थनार्थत्वात्॥ आत्मनो विद्यमाने॥ अविद्यमाने पुत्रे अजाते वा मृते वा यज
मान आत्मनो नाम गृण्हीयात्॥ यदि पुत्रो न स्यादप्यात्मन एव नाम गृण्हीयादिति श्रुतेः॥ कश्चि
श्चित्पुत्ररहितस्त्वेन्मृतं पुत्रो वा न तदा आत्मनो नाम गृण्हीयात्तथा च इदं मे कर्मेदं वीर्यं देवदत्तो

श्री हं संततनवानीतिनामग्रहणमितिहरिस्वामिनः॥ नंतवेस्याज्योतिषेतेतिवा॥ अथवा॥ विद्यमानेपुत्रे
३६ इदंमेकर्मेदंवीर्यंतंतवेत्साज्योतिषेत्वानुसंततनोत्वितिप्रयोगोभवति॥ एतदप्यर्थंकर्म॥ अनेकयज
४० मानकेविष्णुक्रमणभागभूमिप्राक्सूर्यावेक्षणप्रदक्षिणवर्त्तनप्रागमनेष्वन्वारंभः॥ आहवनीया
वेक्षणगार्हपत्योपस्थानपुत्रनामग्रहणतूष्णीमाहवनीयोपस्थानव्रतविसर्गप्रागप्राप्तानानिभे
देनेतिसंप्रदायः॥ आहवनीयमुपतिष्ठतेतूष्णीं॥ पुत्रनामग्रहणानंतरंयजमानस्तूष्णीमाहवनी
यमुपतिष्ठते॥ समीपेस्थित्वातंविलोकयति॥ तूष्णीमितिलौकिकवागुच्चारणनिषेधः॥ क्रियते॥
मंत्राभावात्॥ अथाहवनीयमुपतिष्ठते॥ प्राज्ञ्येयज्ञोनुसंतिष्ठताइतितूष्णीमुपतिष्ठतेइतिश्रुतेः॥
दिविविष्णुरितिक्रमणप्रभृत्याहवनीयोपस्थानांतंकर्मविष्णुक्रमसंज्ञंभवति॥ कृत॥ आहवनीयंचो
पस्थायव्रतादीनिचेदितित्तापकात्॥ प्रयोजनंयत्रविष्णुक्रमानक्रियंतेसववविधेतत्राहवनीयो
पस्थानांतंकर्मनिवर्त्तते॥ नक्रमणमात्रं॥ यत्रविधीयते॥ विष्णुक्रमान्कुर्याद्धविर्यज्ञविधइतितत्रा
हवनीयोपस्थानांतंनविधीयतेइति॥ व्रतंविसृजेतयेनोपेयात्॥ ततोयजमानोव्रतंविसृजते॥ या
स्त्रिषसस्सवदनादिनियमंमुंचति॥ येनोपेयादितियेनमंत्रेणपूर्वमुपेयादुपेतंभवेत्तेनमंत्रेणविसृ
जेदित्यर्थः॥ पूर्वंहिव्रतग्रहणेहोमउक्तो॥ अग्नेव्रतपतइदमहमितिचेति॥ तेनैवमुच्यते॥
यदापूर्वमग्नेव्रतपतेव्रतंचरिष्यामीसनेनोपेतंतदाअधुनाग्नेव्रतपतेव्रतमचारिषमितिसनेनवि राम
सृजते॥ यदाचपूर्वमिदमहमनृतादितिसनेनोपेतंतदिदानीमिदमहंयएवसनेनमंत्रेणविसृजते॥ ३६
एवमेकअथसहत्थिनेविसृजनइत्युपत्रपृथक्श्रूयते॥ संयत्तपतिराशिषेतिभागंप्राश्नाति॥

भ

संयत्तपतिरित्यनेन मंत्रेण यजमानः स्वभागं प्राश्नाति ॥ अनेकयजमानके सर्वे विभज्य प्राशनं कु
र्युः ॥ ब्रह्माप्यस्मिन्ने ॥ व काले ब्रह्मभागं प्राश्नाति ॥ तमिष्टेः संस्थितायां प्राश्नीयादिति छंदोगसूत्रात्
ब्रह्मभागमाहरति नासंस्थिते तं भक्षयतीत्यापस्तंबः ॥ मानवे प्राशित्रहरणे ब्रह्मभागमादधातीति
न्याये तेप्राश्नात्पूर्वं चासमिष्टयजुष इति व्रतविसर्गभागप्राशनयोरंतापछिन्नेपि प्रवृत्तिः ॥ प्रति
पत्तिरूपत्वात् ॥ ब्राह्मणं तर्पयितवै ब्रूयात्तेषु मेवैतत्तर्पयतीति श्रुतेस्तर्पयतीति श्रुतेः ॥ प्राशप्रा
शनानंतरमध्वर्युर्ब्राह्मणं तर्पयितवा इतीमं प्रैषं यजमानं प्रति ब्रूयात् उपविष्ट एव ॥ प्रैषानं
तरमेवात्र ब्राह्मणस्तृप्तिपर्यंतं भोजयितव्यः ॥ कुतः ॥ यज्ञमेवैतत्तर्पयतीति श्रुतेः ॥ इति श्रव
णात् ॥ स हैष यज्ञ उवाचेति प्रकृत्य स तृप्यायावै बिभेमीति कातेत्स्मिरिति ब्राह्मणस्यैवंतसिमनुत्
प्येयमिति तस्मात्संस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयति ॥ ब्राह्मणतर्पणेनै
व यज्ञस्तृप्तो भवति नान्यथा ॥ अतश्च प्रैषार्थानुष्ठानं ब्राह्मणभोजनरूपमन्यपदार्थेन प्रैषमात्र
मित्येवं स्थापयितुं मंत्रश्रुत्युपादानं ॥ अयं च प्रयाजादिवद्दृष्टआराडुपकारको दृष्टोसादकः पदा
र्थः ॥ क्रतोरंगं ॥ तेन प्रयाजाद्यकरण इवास्याकरणे क्रतोर्वैगुण्यं भवति ॥ अकृते च तस्मिन्निष्टेर
समाप्तत्वाद्विष्ट्यंतरारंभो न कार्यः ॥ ब्राह्मणभोजनानंतरं च नमः ॥ कृताये सनेन समिदाधा
नोपस्थानहोमानामन्यतम ब्रह्मा करोति ॥ द्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः ॥ अत्र श्रुता
वयव्रतं विसृजनत इदमहं य एवास्मि सोस्मीति ॥ अयमेव व्रतविसर्गमंत्रो भिहितो न पक्षांतरं ॥
तेनैवं स्थापयते इदमहमित्येवं मंत्रश्रुत्यभिमत इति हरिस्वामिनः ॥ समाप्तोयं पौर्णमासः सर्वासि
ष्टिषु पशुबंधेषु यागेषु सौत्रामण्यां च प्रकृतिभूतः ॥ यद्यप्ययं कृताधानस्य भवति ॥ तथाप्याधाने

श्री षीनांतनूहविःसंज्ञकानांपौर्णमासयागः॥ प्रकृतिस्तस्मात्पूर्वमुपदेश्यः॥ ननुतर्हितनूहविषामेव
३७ सर्वेष्टिप्रकृतित्वंकृत्वातान्येवपूर्वंकस्मान्नोपदिष्टानि॥ सत्यंकिंतुतेष्वितिकर्तव्यतावैकृतसर्वा
37 नात्सर्वप्रकृतित्वंनसंभवति॥ तस्मात्पौर्णमासयागएवपूर्वमुपदिष्टः॥ ॥इतिश्रीत्रिरग्निचि
त्संम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसूतेनयाज्ञिकश्रीदेवदत्तकृतेकात्यायनभाष्येतृतीयो राम
ध्यायः॥ ॥समाप्तः॥ ॥शुभंभवतु॥ ॥शुभमस्तु॥ ॥कल्याणमस्तु॥ ॥छ॥ ॥छ॥छ॥ ३७

त्रितीय